Shri Kantha Sivacharya

Brahma mimansa saiva bhashya

Pt 1 - Sec 1.

ब्रह्म मीमांसा शैव भाष्य - प्रथम अध्याय-
प्रथम पाद

Sanskrit-

Paper — Handwritten

1946 Sambat (129 years old)

37 Folio

11.8" x 6"

Complete

श्रीगणेशानमः

॥इतिश्रीकंठशिवाचार्यविरचिते

॥ब्रह्ममीमांसाशैवभाष्यस्यप्रथ

॥मोध्यायस्यप्रथमपादारंभः॥

(पत्रःसूती)

श्रीकंठी
यशैवभा
ष्यः १

श्रीमन्महागणपतयेनमः ॐ श्रीमत्सद्गुरुशंकरेंद्रचरणद्वंद्वंस्मरण्यादरात् श्रीमद्वि
श्वपतिंचदंढिगणपंध्यात्वान्नपूर्णांबिकां श्रीमद्व्यासनिरूपितोत्तममहासूत्रीयभाष्यो
त्तमं श्रीकंठीयमद्यलिखाम्यतिनरामत्नोप्सरेमद्रतिः १ अथब्रह्ममीमांसाभाष्यप्रथमा
ध्यायस्य प्रथमपादारंभः ॐ नमोऽहंपदार्थायलोकानांसिद्धहेतवे सच्चिदानंदरूपाय
शिवायपरमात्मने १ निजशक्तिभित्तिनिर्मित निखिलजगज्जालचित्रनिकुरुंबः सज
यतिशिवः परात्मासकलागमसारसर्वस्वं २ भवतुसभवतांसिद्ध्येपरमात्मासर्वमंग-
लोपेतः चिदचिन्मयः प्रपंचः शेषोऽपियस्यैषः ३ नमःश्वेताभिधानाय नानागमवि १
धायिने कैवल्यकल्पतरवे कल्याणगुरवेनमः ४ श्रीमतांव्याससूत्राणांश्रीकंठी
यःप्रकाश्यते १ मधुरोभाष्यसंदर्भोमहार्थोनातिविस्तरः ५ व्याससूत्रमिदंनेत्रंविदुषां

ब्रह्मदर्शने पूर्वाचार्यैः कलुषितं श्रीकंठेन प्रसाध्यते ६ सर्ववेदांतसारस्य सौरभा स्वादमोदिनां आर्याणां शिवनिष्ठानां भाष्यमेतन्महानिधिः ७ इहोपनिषदो मीमांसा समारभ्यते तदेतदारंभोऽत्र किं पुरुषार्थः। पुरुषार्थो हि नित्यावधिमहत्त्वास्य ह्योः सुखदुःखयोः प्राप्तिरत्यंतनिवृत्तिर्वा। कश्चेहाधिकारी। यस्यार्थित्वादयो धर्माः। किमस्य विषयः। यदप्रसिद्धमनतिप्रसिद्धं च संदेहदोलासमारूढं वर्तते। कस्यानंतरमस्यारंभः[2] यस्य नियतप्रयोजकतया पूर्वभावित्वमवगम्यते। इति श्रोतृजनमनः समाहितस्य शंकाशंकोः[1] समुन्मूलनाय सर्वज्ञशिखामणिना भगवता व्यासेन समवतारितमिदं सूत्रं[2] अथातो ब्रह्मजिज्ञासा १ इदमेकमधिकरणं विषयसंशयपूर्वपक्षसिद्धांतनिर्णयसंगतीनामाधारत्वमिहाधिकरणत्वं अत्राथशब्दोऽयमानं

१ प्रकाशनेइतिपा० २ कस्यानंतर्यमस्यारंभस्य समयः इतिपा०

तर्यार्थः। ननु "अथयोगानुशासनं" इत्यादाविवाधिकारार्थः। अधिकारशब्दोऽयमारंभा
र्थः। २ नखलु ब्रह्मज्ञानेच्छा कर्त्तव्यत्वेन आरंभयोग्या भवति सा किल विषयरामणीयक
२ मात्रसंभाव्या। ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ३। कंठं भित्वा विनिर्यातौ तस्मा
न्मांगलिकावुभौ॥ इति स्मृतेरयमथशब्दो मंगलार्थो न वर्णनीयः। जिज्ञासां प्रति ५ मंगल
स्यान्वयासंभवात्। शास्त्रारंभे शिष्टाचारपरिपालनार्थं मंगलाचरणं तु वर्णध्वनिमात्रेण
सिध्यति। ६ नचापपक्षांतरपरिग्रहार्थः। पूर्वमेकस्यानुक्ततया तत्प्रसंगाभावात्। नचाभोज २
नगमनादिवदनियतं यत् किंचित् पूर्ववृत्तमपेक्ष्यायमथशब्दप्रयोगः। नियतसाम
ग्रीभूतस्यकस्यचिदत्रविवक्षितत्वात्। यस्यचासंपत्तिरिहाधिकारिविशेषणतया ब्रह्म
विचारस्यासाधनं। तत्पूर्वभावीति विज्ञायते। अथाष्टवर्षत्वादियुक्तब्राह्मणाद्युपयुक्तकाय

१ ननः शंकाशब्दस्य इतिपा० ३ अधिकारो हि प्रारंभः। इतिपा० ५ जिज्ञासया इतिपा०
२ प्रथमसं० इतिपा० ४ णोमुखात् इतिपा० ६ कस्मात् इतिपा०

नयनसंस्कारपूर्वकस्य ॥ स्वाध्यायोऽध्येतव्य ॥ इतिस्वविधिप्रयुक्तनयानियमामस्यनिय
मोपासिताचार्यमुखलब्धाक्षरग्रहणरूपस्य तस्यार्थज्ञानफलस्य वेदाध्ययनस्य ब्रह्म
विचारात् पूर्वभावित्वंयुक्तं । धर्मवद्ब्रह्मणोऽपिवैदिकसिद्धांतत्वात् । अनधीतवेदस्य नहि
चारणनुपपत्तेः । अतः केवलाध्ययनानंतरंब्रह्मविचारइतिचेत् । भवतुनामतादृशमध्यय
ने तदनंतरंचधर्मविचारः । तस्यतदसिद्धौ सिध्यभावात् । तथाचाचार्यैःप्रतिपादितं । अ
थातोधर्मजिज्ञासा ॥ इति । प्रथमत उपाध्यायादध्ययनानंतरं धर्मविचारप्राप्तिरिति । नव
यं धर्मब्रह्मविचाररूपयोः शास्त्रयोरत्यंतभेदवादिनः । किंत्वैकत्वाभिप्रायवादिनः । धर्मब्र
ह्मणोराराधनाराध्यभूतयोः प्रतिपादकं । अथातोधर्मजिज्ञासा ॥ इत्यारभ्य । अनावृत्तिः
शब्दात् ॥ इत्येतावत्पर्यंतमेकमेवशास्त्रं । तत्र ॥ अथातःशेषलक्षणं ॥ इत्यादिवद्वांतरप

१ विचारः साधनंविनासाध्यनिष्पत्तेः । इति० पा०

रिच्छेदार्थोऽयं॥ अथातो ब्रह्मजिज्ञासा॥ इत्यारंभः॥ अथवा धर्मस्य ब्रह्मबोधहेतुत्वात्
तद्विचारोपयुक्तानां श्रुतिलिंगादीनां वद्चोदनार्थवादस्मृत्यादिप्रमाणप्रतिपादनादीनां
ब्रह्मविचारोपयुक्ततया च धर्मविचारानंतरं ब्रह्मविचारः संभवति॥ साधनानिश्चये साध्या
निश्चयात्॥ ब्रह्मबोधं प्रति धर्मस्य साधनत्वे॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषं-
ति यज्ञेन दानेन तपसानाशकेन॥ इत्यादिश्रुतिरेव भगवती प्रमाणं॥ न च कर्मणो ब्रह्मबो
धसाधनत्वेन तद्विचारापेक्षानुष्ठेयं च॥ किमनेन ब्रह्मपरवेदांतवाक्यविचारप्रयासेनेति वा
च्यं॥ तस्य फलाभिसंधिरहितस्य पापमलापकर्षणसंस्काररूपेणाधिकारिणश्चित्तशु ३
द्धिसंपादनद्वारा बोधहेतुत्वात्॥ तथाभियुक्तस्मृतिः॥ यस्यैते चत्वारिंशत्संस्काराः॥ इ
त्यादिना॥ स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति॥ इत्येतेन गर्भाधानादिसकलकर्मणा

पापमलापकर्षसंस्कारहेतुत्वं प्रकाशयतिः अपश्रीहिमोक्षणावत्सर्वकर्मणांसंस्कारक
त्वेः सर्वेपातेपुण्यलोकाभवंति ॥ इतिश्रुत्युक्ताश्रमफलस्वातंत्र्यंनस्यादितिचेन्नः पुण्यलोक
फलाभिसंधिपूर्वककर्मणांस्वातंत्र्येःपिनदभिसंधिरहितेनपुंसानुष्ठितकर्मणांचित्तशुध्या-
दिसंस्कारजनकत्वोपपत्तेः ॥ तथाचास्यपुंसोपदेवज्ञानफलं तदेवकर्मफलंचः यथाव्रीहिप्रो
क्षणांदर्शपूर्णमासोत्पत्तमपूर्वहेतुतयास्वर्गेसमुज्जीयतेतथाकर्माणिज्ञानफलप्रयोजकत
यामोक्षेसमुज्जीयंतेः अतोगुणकर्मत्वादंगत्वमेषां ॥ ॥ननुनित्यविधिप्राप्तस्यज्योति
ष्टोमादेरितिकर्तव्यतात्वविरोधान्नसंस्कारतासिद्धिरितिचेन्नः क्रत्वर्थतयास्वातंत्र्यविहितस्य
२ सौत्रामणिबृहस्पतिसवादेरग्निचयनवाजपेयादांतत्ववदुभयविधिबलादुभयसिद्धेः
अतोयावदुत्पद्यतेज्ञानंतावदनुष्ठेयानिकर्माणि ॥ ॥ननुविविदिषंतिः इतिश्रवणात्कर्म

श्रीकंठी णांज्ञानेच्छासमुदपपर्यंतमनुष्ठानमितिचेत् नसारमेतत् इच्छयान्यपुरुषार्थत्वात् अतः
यशैवभा कर्मणांब्रह्मबोधसाधनानांविचारस्यानंतरंब्रह्मबोधकशास्त्रारंभः समुचितः॥ ॥न
ष्यं नुकर्मब्रह्मविचारयोः क्रमनियमः कथमुपपद्यते कर्त्रैक्यात्। इतिचेन्न; कर्त्रैक्यमिह
४ धारदर्शपूर्णमासवदंगांगित्वेन वा पंचप्रयाजवदेकांगिप्रयुक्तानेकांगत्वेन वा गोदोहना
दिवदधिकारांतरप्रयुक्तोपजीवित्वेन वा षड्भागवत्फलैक्येन वा भवति: तथात्वे विचारयोः
श्रुत्यादिप्रमाणमेव न संपद्यते अतः कर्मब्रह्मविचारयोर्न क्रमनियमो युक्त इति; यदि
श्रुत्यादिप्रमाणं न संभवति तदा खलु तथात्वं स्यात्; विद्यांचाविद्यांच यस्तद्वेदोभयं सह ६
नेनैति ब्रह्मवित् पुण्यकृत्॥ सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यक् ज्ञानेन ब्रह्मचर्ये
ण इत्यादिका ज्ञानकर्मसमुच्चयविधायिनी श्रुतिरुपपद्यते। अतः कर्मज्ञानयोर्मोक्षे

कफलत्वात्तद्विचारयोरपि क्रमनियमो युक्तः यद्यप्यक्षरग्रहणमात्रपर्यवसायित्वमध्ययन
विधेस्तथापि विचारयोर्नैष क्रमसंभवः ; सांगाध्ययनेनापाततः पदार्थमात्रप्रतीतेः ; तदनु ब्र
ह्मणः स्थूलोपासनभूतज्योतिष्टोमादिविधायकानां सूक्ष्मोपासनभूतदहरादिविद्याविधा
यकानां च परस्परविरोधाभासे पश्यंस्तद्विचारे पुरुषार्थकांक्षी पुरुषः स्वयमेव प्रवर्तते ; ततश्च
नानिबंधनो विचारः ननु श्रोतव्य ॥ इति वाक्येन वेदांतश्रवणं साक्षाद्विधीयत इति चेन्न विधि
त्वप्रयोजकरूपसंपत्त्यभावात् ; तथा हि वेदांतश्रवणं नापूर्वविधिगोचरः प्राप्तत्वात् ; प्राप्तिश्च वे
दांतश्रवणस्य विषयोपपादनावगतिसाधनं शास्त्रश्रवणत्वाद्व्याकरणश्रवणवदित्यादिभिः ; न-
चास्य नियमविधिगोचरत्वं अवघातादिवत्कस्यचिद्दृष्टफलस्याप्राप्तेः ; न च परिसंख्याविधि
विषयत्वं तथा सति पूर्ववेदांताः श्रोतव्याः एव नाध्येतव्या इति पर्यवस्येत् ; तथा सत्यनधीतवे

दांतानां विचारयोगाद्पुरुषार्थत्वसंभवः ॥ यदि वेदांतश्रवणस्य परिसंख्यापरत्वं कर्मकांडश्रवण

निषेधपरमिति विचारः ॥ तदा विचाराभावात्कर्मानुष्ठानासंभवः ॥ तदभावे चित्तशुध्यभावाज्ज्ञा

नानुत्पत्तिः स्यात् ॥ तस्मात्पूर्वोक्तमेव समीचीनं ॥ अतः सकलचिदचित्प्रपंचाकारपरमशक्तिवि

शिष्टाद्वितीयवैभवस्य सकलनिगमसाररहस्यनिधानस्य भवशिवसर्वपशुपतिपरमेश्वरमहा

देवरुद्रशंभुप्रभृतिपर्यायवाचकशब्दसारप्रकाशितपरममहिमविलासस्य स्वशेषभूतनि

खिलचेतनसमुपासनानुगुणसमुदितनिजप्रसादसमर्पितपुरुषार्थस्य परब्रह्मणः प्रतिपा

दकमुपनिषच्छास्त्रं विचारणीयं ॥ तन्नियोगरूपचोदनालक्षणयागस्य तदाराधनविशेषसा ५

ध्यरूपस्य तत्तदर्थवादप्रकटितप्राशस्त्यविलासस्य श्रमादिसंपादितसकलांगपरिकरितस्य ॥ स्व

प्रमाणानुगुणस्मृतीतिहासपुराणाभियुक्तसूक्तिसंदर्भकृतोपबृंहणस्य विधिनिषेधविवे

त्समन्वयोत्सर्गापवादबाधाभ्युच्चयादिमतोनिखिलपुरुषार्थरत्नाकरस्यपरमप्रबोधसा-
धनस्यभगवतोधर्मस्यविचारानंतरमितमथशब्दार्थोनिर्णीतः। अतःशब्दोऽयंवृत्तस्यहेतु
भावेवर्तते। यतोऽधीतवेदेनधर्मोविचारितोऽतस्तदनुष्ठानसंपन्नचित्तशुद्धिनातत्कालसंप
न्नविवेकादिगुणसहकृतपरमभक्तिसंभावितेनानेनब्रह्मापिनिरतिशयनिःश्रेयसकरं
विचारणीयमिति। ब्रह्मणोजिज्ञासाब्रह्मजिज्ञासेतिकर्मणिषष्ठी। परीक्ष्यलोकान्कर्म
चितान् ब्राह्मणोनिर्वेदमायात् ॥ नास्त्यकृतःकृतेनतद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्स
मित्पाणिःश्रोत्रियंब्रह्मनिष्ठं ॥ इत्यादिवाक्यंविषयः। ब्रह्मविचारणार्हंभवतिनवेतिसंदेहः। पू
र्वपक्षस्तुब्रह्मनविचारयोग्यंभवति तत्रसंदेहाभावात्ःकथंसंदेहाभावः। अयमात्माब्रह्म
इतिश्रुतिरहमितिप्रत्ययेनप्रत्यक्षसिद्धमेवात्मानंब्रह्मेत्युपदिशति। ततःकुतोऽत्रसंदेहकले

कप्रसंगः॥ किंचन्आत्मविचारस्यफलंहितद्विषयज्ञानं॰ ज्ञानंहिज्ञेयपरिछेदेवेदांतविचार
जन्यज्ञानंब्रह्मपरिछिनत्तिनवा॰ यदिपरिछिनत्ति तदातस्यपरिछेदानतीतत्वप्रसंगः॰१॰
यदिनपरिछिनत्ति। ब्रह्मतदायथावन्नप्रकाशेत॰ अप्रमितिपरिछिन्नाहियद्रादिरवगम्यते
ततोब्रह्मविषयंज्ञानमपिनसंभवति। तथाचप्रयोजनं नकिंचित् पश्यामः॰ नमुक्तिप्रयोज
नं अनादिसिद्धस्यसंसारस्यदुरपन्हवत्वात्ः इत्येवंप्राप्तेब्रूमः॰ सर्वथाप्यारंभणीयंशा
स्त्रं॰ ब्रह्मणःसंदिग्धतयाविषयत्वसंभवात्ः तन्निर्णयस्यप्रयोजनत्वाच्चः यत् अयमा
त्माब्रह्म॰ इत्यादिश्रुतिरमुमेवाहंकारवद्धंसंसारिणंब्रह्मेत्यभिधत्तेः अतएवसंदेहः॰ निरस्त ६
समस्तोपप्लवकलंकस्यनिरतिशयज्ञानानंदादिशक्तिमहिमातिशयवत्त्वंहिब्रह्मत्वं अना
द्यज्ञानवासनावष्टंभविजृंभितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेशनिर्गमव्याप्त

खरखशानि: सीमतापसहिष्णुत्वं हि जित्वं: कथमेनयो: परस्परविलक्षणयोरेकभावमाहुः
श्रुतय इति संशय: किं न स्यात्॥ ॥अपि च एवमपि संदिह्यते–अन्नं ब्रह्म–मनो ब्रह्म–वि
ज्ञानं ब्रह्म॥ आदित्यो ब्रह्म॥ नारायणो ब्रह्म॥ इत्यादयो ऽसमञ्जसमर्थं ब्रह्मतामाहुः। तत्र किं वा
ब्रह्मेति अतो बहुधा संदिग्धं ब्रह्मविचारार्हं भवति। ततः श्रवणमननादिनिष्ठितस्य भक्ति-
ज्ञानविशेषाभिमुखस्य परमकारुणिकस्य महादेशिकस्य सर्गेनुग्राहकस्य शिवस्य परब्रह्म
णः प्रसादातिशयेनास्याधिकारिणः प्रध्वस्तपाशपटलात्प्रत्यक्षीभूतनिरतिशयज्ञानानंद
स्वरूपः। तस्मान्नगणसाराकैवल्यमलक्ष्मीः प्रयोजनं च भवति। ततः सविषयं सप्रयोजनं वे
दान्तश्रवणं यदुक्तं "ज्ञेयपरिच्छेदरूपत्वाज्ज्ञानस्य तदपरिच्छिन्नब्रह्मविषयं न संभवति। इति
तदविचारविलसितं ईदृगिदमिति ब्रह्मणः परिच्छेदासंभवेऽपि लक्षणमुखेनेतरव्यावृत्तिमा

त्वेण परिच्छेदसंभवात्ः लक्षणेन परिच्छेदो हि सर्वत्र लक्ष्यविषयमितरव्यावृत्ततया ज्ञानं। उद्दि-
ष्टस्य ब्रह्मणो वेदांतवाक्यैर्निरूपिते परीक्षिते च लक्षणाशत्येभ्यः सजातीयविजातीयेभ्यस्तदि-
न्नस्सकलपदार्थेभ्यो व्यावृत्तिरूपं यत्तत्त्वब्रह्मेति विज्ञापते। ततः समीचीनोऽयं ब्रह्मविषयः शा-
स्त्रारंभः यदहंदिष्टमप्रयोजनं च तत् खलु न प्रेक्षावतां विचारकक्षामधिरोहतीति वेदांत-
शास्त्रविचारस्य प्रमाणप्रमाणाभासप्रतिभासवशात् संदेहास्पदं ब्रह्मविषयो भवति। ब्रह्म-
विदाप्नोति परं। ज्ञात्वा शिवं शांतिमत्यंतमेति॥ ईशं तं ज्ञात्वामृता भवंति॥ तमक्रतुं पश्य-
ति वीतशोको धातुः प्रसादान्महिमानमात्मनः आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिं। ७
ध्याननिर्मथनादेवपाशं दहति पंडितः ज्ञात्वा देवं मुच्यते सर्वपाशैः इत्यादिश्रुत्यभिप्रायेण
१ तस्य ज्ञानोपासनया साधिकारिणः पाशविच्छेदलक्षणमुक्तिः प्रयोजनं च भवतीति प्र

यमाधिकरणेऽप्रतिपादितं १ इहोद्दिष्टस्य ब्रह्मणो यन्निश्चायकं तल्लक्षणं किमित्याकां
क्षायां तल्लक्षणाभिधायि द्वितीयाधिकरणमवतारयति भगवान्सूत्रकारः॥ ॥
जन्माद्यस्य यतः २ ज्ञाते लक्ष्ये लक्षणस्य वैयर्थ्यादज्ञाने तदाकांक्षानुत्पत्तेः कथमत्र ब्रह्म
णो लक्षणकथनप्रसंग इति न शंकनीयं अध्ययनादापाततो ज्ञाते ब्रह्मणि तद्योगात् जन्मा
दि अस्य यतः इति सूत्रपदच्छेदः जन्मादिकं जन्मस्थितिप्रलयतिरोभावानुग्रहरूपं कृत्स्नम
स्य चेतनाचेतनसंमेलनसमरसीभूतस्य प्रपंचविलासस्य यतो यस्मात् तद्ब्रह्मेति शेषः ॥ यतो
वा इमानि भूतानि जायंते येन जातानि जीवंति यत् प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्र
ह्म॥ इति प्रधानक्षेत्रपतिर्गुणेशः संसारबंधमोक्षहेतुः॥ सत्यं ज्ञानमनंतं ब्रह्म॥ सदेव सौ
म्येदमग्र आसीत्॥ ॥एकमेवाद्वितीयं॥ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं। ऊर्ध्वरेतं विरू

श्री· टी· पाक्षंविश्वरूपायवैनमः॥ ॥इत्यादिवाक्यं विषयः अत्रजगतो जन्मादिकं ब्रह्मणिलक्ष
८ णतयासंभवति नवेतिसंदेहः जगतोजन्मादिकं ब्रह्मणोलक्षणंनसंभवति १ संबंधा
भावात् किंच आनंदोब्रह्मेतिव्यजानात् इत्यत्रानंदस्यजगज्जन्मादिलक्षणंपर्यवस्य
तीतिअस्मत्रसदेवसोम्येदमग्रआसीत्॥ इतिसतोजगत्कारणत्वमवगम्यते॥ सत्यंज्ञा
नमनंतंब्रह्म॥ इतिज्ञानमेवापरिच्छिन्नंजगत्कारणंब्रह्मेत्येकत्रविज्ञायते अपरत्रच॥
यदातमस्तन्नदिवानरात्रिर्नसन्नचासंच्छिवएवकेवलः इतिशिवशब्दवाच्यंवस्तुकारण ८
त्वेनसकलपूर्वभाविब्रह्मेतिविज्ञायते अत्रानंदादीनांब्रह्मत्वेविकल्पोवासमुच्चयोवाविकल्पे
भुवनहात्यादिदोषप्रसंगोः अवस्थानः वसिष्ठनविकल्पेःपिब्रह्मानेकत्वप्रसंगः समुच्चयप
क्षेःपितेषांधर्मरूपत्वात्निखिलजगन्निर्माणोपायज्ञानविशिष्टब्रह्मत्वासंभव॥ ॥अपिच

मायांतुप्रकृतिंविद्यात् ॥ इतिश्रुतिर्मायायांजगत्कारणत्वमभिधत्तेतदेवयुक्तंब्रह्मणोज्ञान
रूपस्यजगत्कारणत्वेतस्यविकारापत्त्याः निष्कलंनिष्क्रियंशांतं ॥ इत्यादिश्रुतिभंगप्रसंगात्
अतःसर्वथापिब्रह्मणोजगत्कारणत्वादिलक्षणमभिधातुमशक्यमित्येवमादौपूर्वपक्षास्से
येप्राप्तेब्रूमः यद्यपिजन्मादेर्जगन्निष्ठत्वेनब्रह्मणएवसंबंधः तथापितटस्थ्यनलक्षणत्वंयुज्य
तेःयत्सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरणंशिवतत्त्वंतदेवजगत्कारणंब्रह्मेत्युच्यते
आनंदादीनामेतद्धर्माणांपर्यवसानंसंभवतिः सर्वज्ञत्वंनित्यतृप्तत्वमनादिबोधत्वं स्व
तंत्रत्वमलुप्तशक्तित्वमनंतशक्तित्वंचेत्येतानिसर्वज्ञतादीनिनिरस्तापरोक्षानपेक्षितवाह्य
करणनिष्कलकानुभवविषयनिखिलवस्तुत्वमिहसर्वज्ञत्वं ॥ ॥ सर्वज्ञतातृप्तिरनादिबोधः
स्वतंत्रतानित्यमलुप्तशक्तिः ॥ अनंतशक्तिश्चविभोर्विधिज्ञाःषडाहुरंगानिमहेश्वरस्य ॥ ॥

श्री॰ टी॰ शे॰ यः सर्वज्ञः सर्वविद॥ ॥यस्य ज्ञानमयं तपः॥ इत्यादिश्रुतिभिरीदृग्ब्रह्मणः सिद्धं॰ अनेन सक
भा॰ लचेतनबहुविधकर्मफलभोगानुकूलतनुकरणनिर्माणोपायसामग्रीविशेषज्ञं ब्रह्म निमि
८ त्तं भवति॰ निरस्तसमस्तापस्त्वकलंकनिरतिशयानंदपरिपूर्णत्वमिह नित्यत्वमतं॰ अत ए
व आनंदो ब्रह्म॥ इति श्रुतेः॰ अन्यः खल्वन्योंऽतर आत्मानंदमय॥ इति श्रुत्या॥ सैषानंदस्य मी
मांसा भवति॥ इत्यारभ्याभ्यासानिरतिशयशिरस्कतेन स एको ब्रह्मण आनंद इति निरूपितः॰
परब्रह्मधर्मत्वेन च स एव॰ आनंदो ब्रह्म॰ इति प्राग्रुपाद ब्रह्मत्वेनोपन्यस्यतेः तादृशानंदभो
गरसिकं ब्रह्म नित्यत्वमभिव्यज्यते॰ ब्रह्मणो मनसैव महानंदानुभवो न बाह्यकरणद्वारा॰ त ८
था हि श्रुतिः॰ आकाशशरीरं ब्रह्म सत्यात्म प्राणारामं मन आनंदं शांतिसमृद्धममृतं॥ इति
— आकाश तइत्याकाशः प्रकाशश्चिदंबरमुच्यते न भूताकाशः विशेषाभावात्॰ निखिलजग

दंडखंडमुद्दंडनिकुरंबजलनिधिस्थानीयापरप्रकृतिरूपापरशक्तिर्हि चिदंबरमुच्यते तत्स्वरूपं
ब्रह्मत्वाकाशशरीरं परप्रकृतित्वं चिदाकाशस्य ॥ सर्वाणि ह वा इमानि भूतान्याकाशादे
व समुत्पद्यन्ते ॥ आकाशं प्रत्यस्तं यन्त्याकाशो ह वै नाम रूपयोर्निर्वहिता इत्यादिश्रुतिसिद्ध
सत्यात्मसन्तारूपं प्राणारामं प्राणशब्देन सकलाधारभूतां चिदंबरशक्तिरुच्यते स्वरूपभूतायां
तस्यामेवारामो यस्य तत् प्राणारामं मनआनंदं मनस्यानंदो यस्य न बाह्यकारणेन तन्मनआ
नंदं आत्मानंदमिति चिदंबरं प्रकृतिरुच्यते तथा श्रूयते ॥ यदेष आकाश आनंदो न स्यात्
को ह्येवान्यात्कः प्राण्यात् ॥ इति शांतिसमृद्धं शिवतासंपन्नं अमृतं अनादिमुक्तं अ
मृतश्चिदानंदं परमाकाशरूपं ब्रह्मस्वरूपानंदं मनसैवात्र भवति बाह्यकारणनिरपेक्षमिति सि
द्धः ॥ मनआनंदः ॥ इत्यनेनेदमेव ज्ञापकं ब्रह्मभावमुपगतानां मुक्तात्मनां निरतिशयस्वरूपानं

श्रीकंठीय दानुभवसाधनं न बाह्यकरणनिरपेक्षमंतःकरणमस्तीति ॥ अतो बाह्यकरणनिरपेक्षेण
शैवभाष्यं शुद्धबोधशक्तिरूपेण मनसा स्वस्यानंदमनंतमनुभवसिद्धं ब्रह्म नित्यतृप्तं ॥ न तस्य कदा
१० पि बाह्यसांसारिकसुखलवापेक्षा भवतीत्यर्थः ॥ स्वतःसिद्धनिरतिशयज्ञानवत्वमनादिबो
धत्वं ॥ यत्स्वरूपानंदानुभवसाधनमंतःकरणं ज्ञानं तदनादिसिद्धमेव ॥ ततो नादिबो
धं ब्रह्म संसारनिवर्तकस्य ज्ञानस्यानादिसिद्धत्वात् ॥ नित्यानिवृत्तसंसारदोषं ॥ शांतिसम
मृद्धममृतं ॥ इति श्रूयते ॥ अनन्यप्रेक्ष्यता कार्पण्यरहितत्वेन स्ववशीकृतस्तेरसकलवस्तु
त्वं स्वतंत्रत्वं ॥ ज्ञाज्ञौ द्वावजावीशनीशौ भोक्ता भोग्यं प्रेरितारं च मत्वा विद्याविद्ये ईशते १०
यस्तु सोऽन्यः ॥ इत्यादिषु ब्रह्मणो जडाजडप्रपंचप्रेरकत्वेन स्वतंत्रत्वं सिद्धं ॥ सर्वविषयस्वा
तंत्र्येण ब्रह्मणः सर्वकर्तृत्वसिद्धिः ॥ स्वाभाविकशक्तिमत्त्वमलुप्तशक्तित्वं तथा हि श्रवणे

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ इत्यादिः चिदचित्प्रपंचरूपश-
क्तिविशिष्टत्वं स्वाभाविकमेव ब्रह्मणः कदाचिदपि न निर्विशेषमित्यनेन सिद्धं अपरिच्छि-
न्नशक्तिविशिष्टत्वमनंतशक्तित्वं अनंताभिरेव शक्तिभिर्जगतो जनकं पालकं च ब्रह्म भवा-
ति तथा हि श्रूयते एको रुद्रो न द्वितीयाय तस्थुर्य इमं लोकमीशत ईशिनीभिर्जन-
नीभिः परमशक्तिभिः ॥ इत्यादिः अनंतशक्तिमत्वाद्ब्रह्मणोऽपरिच्छिन्नप्रपंचसमव्यापि
कारणत्वं सिध्यति अष्टाभिधानाधिकरणमिति भव शिव शर्वेशान पशुपति रुद्रोग्र भी-
म महादेवाभिधानाष्टकस्याधिकरणं वाच्यं परं ब्रह्म अस्य सकलशब्दवाच्यत्वेऽपि परमा-
वबोधकत्वेन मुख्यतया भवादिशब्दाभिधेयत्वे न नान्यशब्दाभिधेयत्वाभावप्रसंगः सर्व-
त्र सदा भवतीति भवशब्दवाच्यं ब्रह्म भू धातोः सत्तार्थत्वात् सर्वत्रानुवर्तमानं सद्रूपं ब्रह्मेति

विज्ञायते॥ तथाहि श्रुतिः॥ सदेव सोम्येदमग्र आसीत्॥ एकमेवाद्वितीयं॥ सत्यं ज्ञानम
नंतं ब्रह्म॥ सत्यात्मप्राणारामं मन आनंदं सन्मन॥ इत्यादि सन्घटः सन्पट इति सर्ववस्तु
ष्वनुवृत्तासद्रूपस्य ब्रह्मणः सर्वोपादानत्वं सिध्यति॥ मृदुपरक्तं घटादिकं हि मृदुपादानमि
ष्यते अतः सद्रूपं ब्रह्म भवशब्दवाच्यं भवति शर्वशब्देन सर्वहिंसायामिति धात्वर्थवशात्
सकलसंहर्तृ ब्रह्म प्रतिपाद्यते॥ तस्मा उपसंहर्त्रे महाग्रासाय वै नमः॥ यस्य ब्रह्म च क्षत्रं
च उभे भवत ओदनः॥ इत्यादिभिः सर्वसंहर्तृ ब्रह्म श्रूयते॥ निरुपाधिकपरमैश्वर्यविशिष्टत्वा
दीशानशब्दवाच्यं ब्रह्म॥ य इमांल्लोकानीशत ईशनीभिः॥ इति श्रवणात्॥ ईश्वरस्याशि ११
तत्वापेक्षया पशुपतिशब्दवाच्यं ब्रह्मः तथाहि श्रूयते॥ येषामीशः पशुपतिः पशूनां चतु
ष्पदामुत च द्विपदां॥ इत्यादि॥ पाशसंबंधेन पशुत्वव्यवहारात्॥ पशुग्रहणात्पशुपाशद्वयं च

गृहीतं भवति ॥ अनेन न किंचिन्निमकं ब्रह्मेति विज्ञायते ॥ संसाररुजां द्रावकत्वाद्रुद्रशब्द
वाच्यं ब्रह्म ॥ तरति शोकमात्मवित् ॥ इति श्रवणात् ॥ परतेजोऽभिभवनीयत्वादुग्रशब्द
वाच्यत्वं ब्रह्मणः ॥ न तत्र सूर्यो भाति न चंद्रमा ॥ इति श्रवणात् ॥ नियामकतया निखि
लचेतनभयहेतुतया भीमशब्दाभिधेयं ब्रह्म ॥ भीषास्माद्वातः पवते ॥ इत्यादिश्रुतेः ॥ मह
त्वेन ईड्यमानतया महादेव इत्युच्यते शिवः ॥ तथाथर्वशिरसि ॥ अथ कस्मादुच्यते महा
देवः ॥ सर्वान्भावान्परित्यज्य आत्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेव
इति ॥ निरस्तसमस्तसंसारकलंकतया निखिलमंगलसारतया शिवतत्वं पदं वगम्यते त
दुक्तस्वभावतया सकलजगज्जन्मादिकारणं भवति ॥ न त्वेतादृशमहिमनि जगद्भयकार
णत्वसंभवात् ॥ न देतादृशमहत्वाद्ब्रह्म लक्ष्यते ॥ नेदं शिवशब्दसाध्यमानंदादिधर्माश्र

श्रीकंठीय
शैवभाष्य
१२

यतनपासिद्धः अनन्यानंदादीनांविकल्पादिचिंतानिरर्थिका॥ मायांतुप्रकृतिंविद्यात्॥इ
तिमायायाः प्रकृतित्वमेवशक्तिकाया एव॥ मायिनंतुमहेश्वरं॥ इतिवाक्यशेषात्‌ सू
क्ष्मचिदचिद्विशिष्टंब्रह्मकारणंस्थूलचिदचिद्विशिष्टं तत्कार्यंभवति अतोजगज्जन्मादिल
क्षणंब्रह्मेतिसिद्धांतः॥२॥ ॥लक्षणप्रमाणाधीनाहिवस्तुसिद्धिः जगत्कारणंब्रह्मकिंप्र
माणमित्यतआह॥ ॥शास्त्रयोनित्वात्‌ ३. यतः शास्त्रयोनिः प्रमाणंतत एवजगज्ज
न्मादिलक्षणंब्रह्मभवतीतिशेषः अत्रजगत्कारणं ब्रह्मशास्त्रैकगम्यमुतप्रमाणांतरेण
पिगम्यतइतिसंदेहः। जगदिदंसावयवंकार्यमेव तच्चवैचित्र्यगर्भितत्वेनस्वोचितकर्तृकमिति १२
कर्ताकश्चित्‌ कल्पनीयः सर्वज्ञत्वादिमान्‌ नासौशास्त्रैकगम्यइतिनास्मिन्शास्त्रस्यप्रा
माण्यं शास्त्रस्यप्रमाणांतराप्राप्तविषयत्वात्‌ अतःशास्त्रैकगम्यत्वंजगत्कारणस्यनसं

भवतीतिपूर्वपक्षः॥ सिद्धांतस्तुजगत्कारणंब्रह्मवेदांतशास्त्रैकगम्यं॥ नावेदविन्मनुतेतंबृहं
तं॥ इत्यादिषुवेदांतशास्त्रमंतरेणब्रह्मणोबोधासंभवश्रवणात्॥ यदुक्तंसावयवत्वात्का
र्यत्वसिद्धौप्रपंचस्यकर्तासमुचितःकश्चिदेक इतिसत्यंतत्। विचित्ररचनस्यरथगोपुरप्रासा
दादेर्बहुकर्तृकत्वदर्शनात्॥ तथाच नानुमानेनैककर्तृकत्वसिद्धिः व्याप्तिबलेनतस्यकर्मधा
रवश्यादिप्रसंगात्॥ हेतोःपक्षधर्मताबलादनुमानेनजगतोविलक्षणैककर्तृकत्वसिद्धावपि
निमित्तोपादानशक्तियुक्तैककर्तृसिद्धिर्नास्ति॥ ततोवेदांतशास्त्रैकगम्यंतत्प्रमाणकंब्रह्मे
तिसिद्धं॥ अपिच पूर्वाधिकरणप्रतिपादितजगत्कारणत्वोपयोगिसर्वज्ञत्वंब्रह्मणोऽस्मिन्न
धिकरणेशास्त्राणांवेदांतानांयोनित्वात्कारणत्वात् सिध्यतीत्यपिप्रतिपद्यते॥ इतिकेचिदा
हुस्तदिहसत्वरसमसचनात्मकस्यार्थद्वयाभिधानेश्लेषकाव्यवद्वाक्यभेदादिदोषाभावात्पुनर

धिकरणांतरप्रस्तावः। अत्र " अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद॥ इ
त्यादि श्रूयते विषयः। ब्रह्मणो वेदकर्तृत्वं युक्तं न वेति संदेहः। न युक्तमिति पूर्वपक्षः वाचा विरूप
नित्यया॥ इत्यादेर्वाचो नित्यत्वप्रतिपादिकायाः श्रुतेर्विरोधात् वेदानां ब्रह्मकार्यत्वे न पौरुषेयत्वा
दप्रमाण्यप्रसंगाच्च। तस्माद्ब्रह्मणो वेदकर्तृत्वं कथमिति प्राप्ते ब्रूमः ऽ युक्तमेव ब्रह्मणो वेदकर्तृ
त्वं " अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद॥ इति श्रुतेर्निश्वसितवद्बु
द्धिपूर्वप्रयत्नेन ब्रह्मणः प्रादुर्भावावगमात्॥ ॥अष्टादशानामेतासां विद्यानां भीमवर्त्मनां
आदिकर्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः॥ ॥इति परमेश्वरस्य सकलविद्याकर्तृत्वप्रति ९३
पादनाच्च सृष्टेः प्राक् स्वात्मनि विलीनानां वेदानां पूर्वपूर्ववर्णानुपूर्व्यनुरूपरचनया पुनः कृतो भ
वति सर्वज्ञः परमेश्वरः ऽ अत एव वेदानामपौरुषेयत्वमीश्वरकार्यत्वं च ऽ येषां रागद्वेषादयस्तेषां

वचनेन प्रमाणं ॥ निरस्तसमस्तदोषकलंकस्य नित्यस्य च निरतिशयज्ञानप्रयत्नस्यानुभूयमानत्रै
कालिकवस्तुविलासस्य स्वतःप्रमाणस्य परमेश्वरस्य परमात्मनस्यावाप्तसमस्तकामस्य शिवस्य
ब्रह्मणो वचनं तु प्रमाणमेव ॥ ईशानः सर्वविद्यानां ब्रह्मनो देवः शुभयास्मत्पा संयुनक्ति ॥ इति
हि परमेश्वरस्य सर्वविद्याप्रवर्तकत्वं शुभस्मृतिहेतुत्वं च श्रूयते ॥ अतः सर्ववस्त्ववभासकानां
वेदानां परमेश्वरकर्तृकतया परमेश्वरस्य सर्वज्ञता निश्चीयते अज्ञातस्य वक्तुमशक्यत्वात् ॥
यद्यपि सर्वगतस्य परमेश्वरस्य सर्ववस्तुसंयोयोगेन सर्वज्ञत्वं सिध्यति तथापि सकलवस्त्वव
भासकानां वेदानां प्रणेतृतया विशेषं दर्शयति ॥ यथा दीपः स्वप्रभासंयुक्तोऽपि रूपादिषु स्वप्रमे
व प्रकाशयति न रसादि न तथा परमेश्वरः किंतु स्वशक्तिसंयुक्तः सकलमपि प्रकाशयति ॥
इति ॥ ॥ तत्र परमेश्वरस्य सर्वत्वं नाम वेदोक्तसकलपदार्थाभिज्ञत्वं ॥ तर्हि महर्षीणामपि वेदिनां

श्रीकंठीय सर्वज्ञत्वं सिद्धं: किमत्र वैषम्यं। इति चेन्न: तत्कर्तुरीश्वरस्याधिकं ज्ञानमस्ति· व्याकरणादेरधि-
शैवभाष्य: कार्थविदां हि पाणिनिप्रभृतीनां न तत्प्रणेतृत्वं दृश्यते: वेदश्च सर्वार्थावभासकोऽपि न सर्वं मुख्ये
१४ न याप्रकाशयति· किंतु किमपि लक्षणया किमपि सामान्येन किमपि विशेषेण: परमेश्वर:
सर्वसाक्षी सर्वं प्रत्यक्षयति: वेदेश्वरयोरप्येतावद्वैषम्यमभिव्यते।। ।।ननु परमेश्वरस्यैव वेदकर्तृ-
त्वमिति न नियम:। "प्रष्ठा नावै भूत्वा प्रजापतिरिदं सर्वमसृजत्।" "ऋचो यजूंषि सामानि
इत्यादिश्रवणाद्धिरण्यगर्भादेरपि तत्कर्तृत्वावगमादिति चेन्न: हिरण्यगर्भोप्यत: प्रागपि वे
दानामभ्यासात्: श्रूयते हि "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।" इति: य: १४
सर्वदेवानामादिमस्य हिरण्यगर्भस्यापि कर्ता तस्मै सर्वान्वेदानुपदिशति: स एव सर्वाधि-
को वेदकर्ता परमदेशिक: तथा हि श्रुत्याभिव्यज्यते· "यो देवानां प्रथमं पुरस्ताद्विश्वाधिको

रुद्रोमहर्षिर्हिरण्यगर्भंपश्यतिजायमानंसनोदेवः शुभयास्मृत्यासंयुनक्तु॥इतिमहर्षिर्वेदक
र्तीयः सर्वज्ञत्वादिनाविश्वस्माच्चिदचिद्रूपंचादधिकोरुद्रःपरब्रह्मभूतःसर्वेषांदेवानामिंद्रा
दीनांप्रथममादिमंहिरण्यगर्भंब्रह्माणंस्वसंकल्पेनप्रकृतिरूपादात्मनोजायमानंसृष्टिका
लेसर्वज्ञानोपायसकलवेदोपदेशरूपयानुग्रहदृष्ट्यापश्यन्सपरमदेशिकोनोऽस्मानखिलस
कलसंसारपाशमहानर्थनिवृत्तिहेतुभूतया परमामृतलक्ष्मीसमावेशपरानंदप्राप्तिकारि
णयात एवपरममंगलरूपयावेदांतसारसामरस्यासिद्धया स्मृत्याबोधकलयास्वविषययासं
योजयत्वितितात्पर्यं: ततःसकलवेदकर्तृत्वमीश्वरस्यसिद्धं॥ वाचोनित्यत्वश्रुतिरीश्वरेण पू
र्वसृष्ट्यनुवृत्त्याविहितत्वाद्वेदानामविरुद्धाः ततोवेदानामीश्वरप्रणीतत्वंनित्यत्वंचाविरुद्धमेव
२ प्रथमाधिकरणेजिज्ञास्यतयाप्रतिज्ञातस्य१परब्रह्मणःशिवस्यपरिज्ञानेलक्षणापेक्षायां

श्रीकंठीय · द्वितीयाधिकरणेनलक्षणंजगज्जन्मादिरूपमभिहितं तस्मिन्किंप्रमाणमित्याकांक्षायांतृ
शैवभाष्य तीयाधिकरणेनवेदांतशास्त्रस्यतद्विषयेप्रामाण्यंतन्मूलत्वंचनिरूपितं येनपरस्यव्यभिचारे
१५ णसिध्यतितद्धितस्यप्रमाणमुच्यते वेदांतवाक्यानांकेनकथंवाब्रह्मसाधकत्वं॥ इत्याकां
क्षायांचतुर्थोऽधिकरणमवतार्यते॥ ॥तत्तुसमन्वयात् ४॥ ॥तच्छब्देन
प्रकृतंब्रह्मपरामृश्यते तुशब्देनसर्वाणिवेदांतवाक्यानिसमाहृयंतेसमन्वयशब्देन
तात्पर्येणसंबंधउच्यते तद्ब्रह्मवेदांतवाक्यानितात्पर्यलिंगसंबंधात्साधयंति इतिसूत्रा
र्थः। अस्यसर्वाणिवेदांतवाक्यानिविषयः। वेदांतवाक्यानांब्रह्मबोधकत्वंयुक्तंनवेतिसंश १५
यः। सर्वत्रसंबंधग्रहणसापेक्षंशब्दस्यार्थावबोधकत्वं शब्दार्थयोःसंबंधज्ञानमंतरेण
पुरुषस्यशब्दार्थप्रत्ययोनभवतिःसंबंधज्ञानंचवृद्धव्यवहारसापेक्षं व्यवहारश्चकार्यैक

गोचरः तथा हि गामानय गां बधानेति प्रयोजकवृद्धवाक्यश्रवणसमनंतरं प्रवर्त्तमानं प्रयो
ज्यमवगम्य पार्श्वस्थो व्युत्पित्सुरिदमवधारयति; सर्वथायं कार्यावगतिसमनंतरमेव प्रवृत्ति
नेः सा च कार्यावगतिरेतस्मादेव वाक्यात्समुत्पन्ना; अन्यथा कथमस्यैतद्वाक्यश्र
वणानंतरं प्रवृत्तिर्भवति; तदिदं वाक्यमस्य कार्यबुद्धिमुत्पादयतीति पुनर्गामानयनबंधन
दर्शनात्. कार्यविशेषं निश्चिनोति; तदेवं कार्यार्थत्वाद्व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य
प्रामाण्यं॥ ॥किंच कार्यविशेषत्वाज्ज्ञातः कर्तृविशेषस्य ब्रह्मणो ऽनुमानादपि सिद्धिः;
कथमस्मिन्ननुमानविषयाणां वेदांतवाक्यानां प्रामाण्यं॥ अथवा विधिपराण्येव वेदांतवा
क्यानि न ब्रह्मपराणि; उभयपरत्वे वाक्यभेदः स्यात्; अतो वेदांतवाक्यानां ब्रह्मसाधकत्व
मयुक्तमिति पूर्वपक्षः। युक्तमिति सिद्धांतः। वेदांतवाक्यानां तात्पर्यलिंगसमन्वयेन ब्रह्मबो

घतसमर्थत्वात्॥ यदुक्तं॥ “कार्यार्थत्वाद्व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यं॥ इति॥
तदसत्॥ “पुत्रस्ते जातः” इत्यादिष्वपि सिद्धार्थेषु वाक्येषु निश्चिनोति संबंधं। संबंधग्रह
णयोग्य[1] वृद्धव्यवहारे॥ प्रयुयुत्सुः स्वस्य प्रवृत्तिहेतुभूतायाः कार्यावगतेः पदार्थज्ञानपू
र्वकत्वावगमात्। प्रयोज्यवृद्धस्य प्रयोजकवाक्यं पदार्थज्ञानमुत्पादयति। इति निश्चिनोति॥
ततः सिद्धार्थेप्यपि शब्दस्याभिधाननिश्चयः॥ अथवा किमिह वृद्धव्यवहारेण। व्युत्पत्तेः
प्रकारांतरेणापि सिद्धत्वात्[2]। तथाहि। बालामात्रादिभिः शशिपशुप्रभृतीनर्थानंगुल्या
[3] दिना निर्दिश्य तत्तच्छब्दास्तेषु तेष्वर्थेषु प्रयुंजानैर्बहुशः शिक्षितास्तेषु तेष्वर्थेषु व्युत्पद्यंते॥ का १६
व्यनाटकाभिज्ञाः पुरुषसमीपमत्तपदविच्छेदकत्वात्स्वशब्दस्यापमर्थं इति सर्वशब्दा
नामर्थमवगच्छंति॥ अतः सिद्धार्थेऽपि व्युत्पत्तिसंभवात्तत्र शब्दस्य प्रामाण्यमस्ति॥ ततो

१ वाक्येषु संबंधग्रहदर्शना· इति पा० २ सिद्धत्वाच्छब्दार्थसंबंधग्रहस्य इति० पा० ३ तथा नन्वयप्रयोगमवेहि·
इममंत्रगच्छ इत्यभिप्रायेणांगुल्या· इति० पा०

वेदांतवाक्यानां ब्रह्मणि प्रामाण्यं ; यदुक्तं ''जगतः कार्यविशेषत्वात् कर्तृविशेषस्य ब्रह्मणो
ऽनुमानादपि सिद्धि'' इति ; तन्न संभवति : विचित्ररचनस्य रथगोपुरप्रासादादेरनेककर्तृ
त्वदर्शनादनुमानेनास्य जगत एककर्तृकत्वसाधनायोगस्य व्याप्तिबलात् कार्यविशेष-
त्वादीनां कर्त्तरि प्रामेप्यत्र पूर्वोक्तत्वात् ; अतो नानुमानगम्यं ब्रह्म भवति ॥ ॥ किंच श्रु
तानुगृहीतादनुमानादपि ब्रह्मणि प्रमाणं भवतु नाम : यत्र वाक्यानां तात्पर्यं तत्र हि तेषां प्रामा
ण्यं न प्रत्यक्षादीनामिव सर्वत्र ॥ ॥ ननु वेदांतवाक्यानां ब्रह्मणि तात्पर्यनिर्णायकानि
कानि लिंगानीति चेत् । उपक्रमादीनि तथा पठंति ॥ उपक्रमोपसंहारावभ्यासोऽपूर्वता-
फलं ॥ अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ॥ ॥ इति तदिहोपक्रमादिभिर्लिंगैर्वेदां
तवाक्यानां ब्रह्मणि तात्पर्यं निश्चीयते ; स उपक्रमादिभिस्तात्पर्यनिर्णयस्त्वेव वेदांतवा

श्रीकंठीय वाक्यानां श्रवणमित्युच्यते तथाहि १ ॥ अज्ञानप्रभवं दुःखं ज्ञानेन तस्य निवर्तकं ॥ सर्ववेदांत
शैवभाष्यं वाक्यानां श्रवणे तत्प्रवर्तके । श्रवणं नाम सर्ववाक्यानां वैदिकानां परात्परे ॥ उपक्रमादिभि
१७ र्लिंगैः शिवे तात्पर्यनिर्णयः ॥ इति उपक्रमोपसंहाराविवेके लिंगैः वेदांतवाक्यानां ब्रह्म
णि शिवे तात्पर्यनिर्णयेन तत्तात्पर्येनाम स्वरूपोपासनाविषयत्वं २ उपक्रमोपसंहारौ
सदेव सोम्येदमग्र आसीत् ॥ इत्युपक्रमः ॥ तत्त्वमसि ॥ इत्युपसंहारः ॥ धातुः प्रसादा
न्महिमानमीशं ॥ इत्युपक्रमः ॥ यः परः स महेश्वरः ॥ इत्युपसंहारः ॥ एवमन्यत्रापि द्रष्टव्यं
तत्त्वमसि ॥ ॥ सर्वो वै रुद्रः ॥ अंबिकापतय उमापतये ॥ यो वै रुद्रः स भगवान् भूर्भुवः स्वः १७
॥ इत्यभ्यासः ॥ अपूर्वता वेदेतरप्रमाणाप्राप्तत्वं ॥ फलं मुक्तिः पृथग्ज्ञानं ३ ॥ अर्थवादो
जगत्सृष्टिस्थितिप्रध्वंसादयः ॥ उपपत्तिर्विरोधाभावः ॥ सर्वज्ञतादिसंपत्तिर्वा ॥ एतैर्लिंगैर्ब्रह्मणि

१ त्युच्यते इति पा० २ तत्स्वरूपोपासनाविषयत्वं इति वरपा० ३ फलं ब्रह्मज्ञानं इति वरपा०

तात्पर्यमवगंतव्यंवेदांतवाक्यानां॥ ॥ननुनकेवलंब्रह्मपरावेदांताः।किंतु॥आत्मावाअरे
रेद्रष्टव्य॥इत्यादिश्रुतत्वानविधिपराण्यपिविज्ञायंते।उभयपरत्वेवाक्यभेदप्रसंगः॥इतिचेदु
क्तंतन्नःरूपप्रत्यायकेनचक्षुषायथाद्रव्यस्यापिसिद्धिस्तथाविधिपरैरपिवेदांतैर्ब्रह्मसिद्धिरि
तिनोभयपरत्वेविरोधः३शाब्दंहिब्रह्मज्ञानंतद्ब्रह्मवाचिशब्दादेवप्राप्तंभवति।तद्विधिना
किंप्रयोजनमितिचेत्३प्राप्तावपिमंत्रादिष्विवाविरोधःप्रयोजनस्यानुष्ठानादेःसंभवात्
यथाद्रव्यदेवतादिप्रकाशकेषुमंत्रेष्वधीयमानेषुद्रव्यादिज्ञानेजातेःपिपुनरनुष्ठानकाले
मंत्रैरनुस्मर्तव्यमितिप्रयोगविधिरुपलभ्यतेतथात्रापीति।नचोत्पत्तिविनियोगाधिकारवि
धीनामसंभवात्प्रयोगविध्यसंभवइतिशंकनीयं३उत्पत्तिविधेरध्याहारेणापिप्रसिद्धेःप्रक
रणवशाच्छमादिकंविनियोजयन्॥आत्मानंपश्येत्॥इतिप्रयोगविधिरुपपद्यतेःननुश्च

रात्रिसत्रन्यायेन ॥ ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ इत्याद्यर्थवादावगते मोक्षकामोऽधिकारी कल्प
नीयो भवति । ततो मोक्षकामः शमादियुक्तो ब्रह्मज्ञानं संपादयेदिति प्रयोगविधिलाभः । ननु
ब्रह्मज्ञानस्य विधेयत्वमनुपपन्नं । आत्मा वा अरे द्रष्टव्य ॥ इत्यादौ नित्यब्रह्मण्याप्यान
निर्विकारे विशुद्धे चात्मनि न कर्मकारकभावोपपत्ते र्न विधिसंभवः । उत्पत्तिप्राप्तिविकार
संस्काराणामत्रासंभवात् ॥ ॥ न च स्वतंत्रफलाद्यमनुन्यायेन कर्मकारकतां परित्यज्य कर
णत्वाविपरिणामेनात्मना पश्येदिति विधातुं शक्यं । वैषम्यात् । तथाहि क्रियाकृतातिशयस्य
भस्मीभावलक्षणस्य सक्तुष्वसंभवात् तेषु शब्दतः कर्मत्वेऽप्यर्थतः करणत्वमेव पर्यवसितं
३ तदस्यात्मनि न संभव ४ अथश्चापि वेदान्तानां न ब्रह्मज्ञानविधि परत्वमिति चेन्न । आ
त्मनि कर्मत्वप्रयुक्तोत्पत्त्याद्यसंभवेऽपि कर्तृस्थमोक्षफलाय विध्युपपत्तेः । आप्ते कथं विधिरिति चे

१ तद्दर्शनादिविधि इति पा० २ नचोत्पत्तिविनियोग इति पा० ३ शब्दतः करणत्वेऽप्यर्थतः कर्मत्वाम
स्मिन्निति वरपा० ४ न तस्यात्मनि संभव इति वरपा०

न्नः यामिः याक्षिकी नित्या वा । उभयथापि नियमादिविधिः संभवति ॥ ॥ ननु तथा सति वेदांता
नां विधिपरत्वेन ब्रह्मपरत्वमनुपपन्नमेव । यदुक्तं ॥ रूपप्रत्यापकेन चक्षुषा दृश्यसिद्धिवद्विधिप
रेऽपि वेदांतैर्ब्रह्मसिद्धिः ॥ इति । पदयुक्तं ॥ चक्षुर्हि संप्रयोगापेक्षमेव १ प्रति वस्तुप्रमाणं । न तथा
शब्दः ॥ किंतु यत्र तात्पर्यं तत्र प्रमाणं । तस्माद्वेदांतानां ब्रह्मप्रमापकत्वं ब्रह्मज्ञानविधायकत्वं
च न संभवतीति चेन्न ॥ ॥ समिधो यजति ॥ इत्यादीनां वाक्यानां पंचप्रयाजविधायकत्वं तद
नुष्ठानक्रमविधायकत्वं चेत्युभयपरत्वदर्शनाद्वेदांतवाक्यानामपि ब्रह्मप्रमापकत्वं ॥ ब्रह्म
ज्ञानं मोक्षोपकारकं प्रति च विधायकत्वं युक्तमेव ॥ ॥ ननु ब्रह्मणो वाक्यादेव ज्ञातेऽपि तज्ज्ञा
नविधिः किं प्रयोजनः । इति चेन्न ॥ वाक्येन परोक्षत्वेन ज्ञातेऽपि ब्रह्मणि तत्साक्षात्काराय ज्ञा
नविधेरुपपत्तेः ॥ कथं भेद इति चेत् ॥ यच्छब्दजन्यं ज्ञानं न तत्साक्षात्कारहेतुः ॥ किंतूपासनारूप

ज्ञानमेव: तथा च श्रूयते ॥ ॥ ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमस: परस्ता
त् ॥ = ज्ञाननिर्मथनादेव पाशं दहति पंडित: ॥ ॥ इत्यादिषु ॥ ॥ ज्ञात्वा देवं मुच्यते सर्वपा
शै: ॥ १ = शिवं ४ ज्ञात्वाऽमृतता भवंति = ॥ इत्यादिषु च तथा ॥ २ श्रोतव्य: श्रुतिवाक्येभ्यो
मंतव्यश्चोपपत्तिभि: ॥ मत्वा च सततं ध्येय एते दर्शनहेतव: ॥ ३ इत्यत्र श्रवणमननसंपन्न
ज्ञानाविनाभूतं निदिध्यासनं ब्रह्मण: साक्षात्कारे निमित्तमिति स्मर्यते: अत उपासनरूपं ज्ञा
नं मोक्षफलं विधीयते: ४ आत्मन्येवात्मानं पश्येत ॥ शंभुमाकाशमध्ये ध्येय ॥ इत्यादिषु ॥ त
ज्जलानिति शांत उपासीत ॥ ॥ इति प्राचीनयोग्योपास्व ॥ इत्यादिषु च प्रसिद्धमेव: तथा ॥ ब्र १९
ह्मविदाप्नोति परं ॥ ॥ इत्यादिषु ब्रह्मस्वरूपोपासनात्तत्फलादिकमुपदिश्यते: अन्यथा स
मत्वादिविशिष्टब्रह्मणा सह कथं सकलकामावाप्ति: फलं तादृशब्रह्मसाक्षात्कारणं च सि

१ संप्रयोगे सति निरपेक्षमेव इति पा० २ स्वरूपप्रमा इति पा० ३ विधिरप्रयोजनत्वस्य पूर्वं ज्ञानादेव सं
भवादिचेन्न: इति पा० ४ इत्थं इति पा०

ध्यति ३॥ सत्यंज्ञानमनंतंब्रह्म॥ ॥आनंदं१ब्रह्म॥ आकाशशरीरंब्रह्म॥ ॥सत्यात्मप्राणा
रामंमनआनंदंशांतिसमृद्धममृतं॥ = ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं। ऊर्ध्वरेतंविरूपा
क्षं॥ इतिसत्यज्ञानानंदस्वरूपेणात्मारामममुपशांतसर्वोपद्रवकलंके सकलमंगलात्मकेपर
मशक्त्याविनाभूतयाशबलस्वरूपतया कृष्णपिंगलंविरूपाक्षंत्रिलोचनंपरब्रह्मेतिप्रसिद्धंश्रु
तिभ्यउपक्रमादितात्पर्यलिंगैर्निर्णीयते २॥ योवेदनिहितंगुहायां॥ ॥इतिप्राचीनयोग्यो
यास्यविश्वरूपायवैनमः॥ इतिज्ञानाविनाभूतंतदुपासनंविधीयते ३ ११ सर्वान्कामान्॥इ
त्यादिनासकलकामावाप्तिर्ब्रह्मणासहोपासकानामवगम्यते। अतोनिष्कामलिंगधर्मोपे
तोनिषिद्धकाम्यकर्मरहितोयथाश्रुतश्रुतिस्मृतिचोदितकर्मानुष्ठानसंपन्नचित्तशुद्धिः शमा
द्यनुगृहीतपरमशिवभक्तिभावितएवंमुमुक्षूणांश्रुतिसारेभ्यः शिवाभिधेयंपरंब्रह्मविदि

१आनंदोइतिवरपा० २ब्रह्मोपक्रमादितात्पर्यलिंगैर्निरूप्यतेइतिपा०

श्रीकंठीय त्वा॥ तदुपासीत॥ इति ज्ञानोपासनाविधिरुपपन्नः। अत्र शिवोपापादनहरणं विरूपाक्षस्य
शैवभाष्यं परब्रह्मणः परमविशुद्धिमंगलभाजनत्वान्मुमुक्षूणामुपासनैकविषयत्वद्योतनार्थः तथा
२० थर्वशिखायां शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य इति श्रूयते शिवशब्दवाच्य
वस्तुन एव ध्येयत्वमिति अन्यथा कथं संसारनिवृत्तिः। निरस्तसमस्तदोषकलंकनिरति
शयमंगलाधारत्वं हि शिवत्वं यज्ज्ञानान्मोक्षस्वरूपं फलमुपयाते॥ ॥यदा चर्मवदाका
शं वेष्टयिष्यंति मानवाः। तदा शिवमविज्ञाय दुःखस्यांतो भविष्यति॥ ॥इति शिव एको ध्ये
यः शिवंकरः सर्वमन्यत्परित्यज्य॥ इति शिवव्यतिरिक्तस्य मुमुक्षूणां ज्ञेयत्वं ध्येयत्वं च परि २०
संख्यातैयः अत। शिव एव परब्रह्ममोक्षकामैर्ज्ञातव्यो ध्यातव्य इति अतस्तात्पर्यलिंगा
समन्वयेन ब्रह्मपरवेदांतानामुपासनविधिपराश्रुत्याविरोधः ५ उक्तस्य ब्रह्मलक्षणस्य

प्रधानेऽतिव्याप्तिमाशंक्याह॥ ॥ईक्षतेर्नाशब्दात् ५॥ ॥छांदोग्ये श्रूयतेऽस्यवि
षयः॥= सदेवसोम्येदमग्र आसीत्॥= एकमेवाद्वितीयं॥ ॥तदैक्षत बहुस्यां प्रजायेय॥इ
त्यादि। इहपूर्वभावितया सकलप्रपंचस्यास्य कारणतया श्रूयमाणं सदिति वस्तु ब्रह्म वा प्र
धानं वेति संदेहः। प्रधानस्यैव जगत्कारणात्ः अत्र हि बहुप्रजाजनकत्वं लोहितादिवर्णत्रि
मितरजःसत्त्वतमोरूपायाः सांख्यप्रकृतेरेव गम्यते॥ तदा तद्गुणेन तत्रापि सच्छब्दवाच्यं जग
त्कारणं प्रधानमेव॥ रजःसत्त्वयोगादस्य क्रियाज्ञानशक्तिसंबंधोऽप्युपपद्यते। येन जगत्कार
णत्वसिद्धिः। अचेतनस्य प्रधानस्य जगदाकारपरिणामो युक्तो न चेतनस्य परमेश्वरस्य कूट
स्थस्य। कारणविकृतिरूपत्वात् परिणामस्य। ततोन्यापतः श्रुत्या च प्रधानमेव जगत्कारणं
सत्पदवाच्यमिति प्राप्ते ब्रूमः। अशब्दमानुमानिकं प्रधानं न जगत्कारणं सत्पदवाच्यं वस्तु। अपि

श्रीकंठीय तुब्रह्मैवचेतनं।ईक्षतिरश्रवणात्.=तदैक्षतबहुस्यांप्रजायेयइतिः नह्यचेतजेप्रधानेचेतनध

शैवभाष्यं: र्मईक्षतिःसंभवतिःयदुक्तं॥ बह्वीःप्रजांजनयंतींसरूपां॥ इतिश्रुतेनरश्रवणात्सांख्यप्रकृ

२१ तेरत्रजगत्कारणत्वं॥ इति। तदसंगतं:= चमसवदविशेषात्.॥ इतिसूत्रेहिपरमेश्वरकारिणि

कायाएवप्रकृतेर्बहुप्रजाजनकत्वमित्युपपादयिष्यामः।=रजःसत्वरूपतयाक्रियाज्ञानश

क्तिसंबंधःप्रधानस्य॥ इतियदुक्तंतदयुक्तं:त्रिगुणात्मिकायाःप्रकृतेस्तमःपार्थक्येनरजः

सत्वयोगाभावात्: १ तमसिन्यग्भूतेरजःसत्वयोरुद्रेकेज्ञानक्रियासंबंधःप्रधानस्येतिनवा

च्यं॥ सत्वरजस्तमसांसाम्यावस्थाप्रकृतिः॥ इत्यंगीकारात्: कूटस्थस्यपरमेश्वरस्यजग २१

दाकारेणपरिणामोविकारहेतुः॥ इतियद्भाणि॰ तदज्ञानविलसितं: नामरूपविभागान

र्हसूक्ष्मचिदचिद्व्यक्तिविशिष्टस्यपरमेश्वरस्यकारणत्वेनामरूपविभागार्हस्थूलचिदचिद्व

१ योरभावात्इति॰पा॰

क्तिविशिष्टस्य कार्यत्वमितिवदतामस्माकंतत्प्रसंगभयाभावात्॥ ॥ननु॥ सदेवसोम्येदम
ग्रआसीत्॥ ॥एकमेवाद्वितीयं॥ इत्यादिनासद्रूपंवस्तुनिर्विशेषमवधारणादवगम्यते॥
कारणावस्थमेतत् कथंसूक्ष्मप्रपंचविशिष्टमित्यत्रआह इतिचेत्॥ सदेवेत्यवधारणेनविशेष
निषेधः॥ किंत्वसत्कारणत्वनिषेधः॥ असद्वाइदमग्रआसीत्॥ ॥ततोवैसदजायत॥ इ
तिश्रवणात् असत्कारणत्वस्यश्रातिप्रसक्तत्वात्॥ ॥किंच॥ सदेवसोम्येदमग्रआसी
त्॥ ॥एकमेवाद्वितीयं॥ इत्यत्रकथंनिर्विशेषत्वंब्रह्मणः॥ आसीत्॥ इतिहिक्रियावि
शेषः॥ अग्र॥ इतिकालविशेषः॥ एकमेव॥ इत्यवधारणमधिष्ठात्रंतरनिषेधपरं॥ अ
द्वितीयं॥ इतिजगदुपादानत्वमुच्यते अतएवसर्वज्ञमनंतशक्तिविशेषंच॥ कथं॥ सर्वज्ञत्वस
र्वशक्तिमत्वविशेषमंतरेण जगदुभयकारणत्वंब्रह्मणोभवति॥ अथयन्नाप्रकृतिप्रसपात्मक

श्रीकंठीय समस्तस्य दृश्यनैकवस्तुपरत्वं युक्तं । प्रकृतसमन्वयेन च समस्तदृश्यनैकवस्तुद्वयप्रतिपादनपरत्वात्
शैवभाष्यं तथाभियुक्तसूक्तिः ॥ ॥ शक्तिः शिवश्च सच्चूर्ण्प्रकृतिप्रत्यययोरितौ । नौ ब्रह्मसामरस्येन
२२ समस्तजगदात्मकौ ॥ ॥ इति । स्थूलसूक्ष्मचिदचित्प्रपञ्चरूपशक्तिविशिष्टः परमेश्वर एव
कार्यकारणरूपः समन्वयविषय इति निर्णयः ॥ ५ ॥ ॥ गौणश्चेन्नात्मशब्दात् ६
ईक्षतेश्चेतनधर्मस्याचेतने प्रधाने योगाभावाच्चेतनमेव परं ब्रह्म समस्तजगत्कारणमिति
प्रतिपादितं । तदसंगतमेव । तत्तेज ऐक्षत ॥ ॥ ता आप ऐक्षन्त ॥ इत्याद्यचेतनेऽपीक्षति
र्यथा गौणः श्रूयते । तथा प्रधानेऽपि गौण इति चेन्न । चेतनवाचिनात्मशब्दात् । सदेव २२
सोम्येदमग्र आसीत् ॥ इत्यारभ्य उपसंहारे । स आत्मा तत्त्वमसि ॥ इति श्रवणात् । तेजःप्रभृ
तिष्वपि न गौणमीक्षतिश्रवणं । तत्तदात्मतया परमेश्वरस्य चेतनस्यानुवृत्तेः ६ तत्रीक्षति

१ अनन्तानां तत्शक्तिविशेषं कथं इति पा०

अवणं गौणमभ्युपेत्याप्यचेतनं प्रधानं सद्रूपं जगतः कारणमिति वक्तुमशक्यं। तस्य चेत
नत्ववाचिन आत्मशब्दात्। इति निरूपितं भवतु नात्मशब्दस्याचेतनं प्रधानमर्थः। भव
ति हि चेतनस्य जीवस्यात्मशब्दवाच्यत्वं मुख्यं। ततो जीव एव चेतनो जगत्कारणं सद्रूपमि
त्यत आह तन्निष्ठस्य मोक्षोपदेशात् ७ सत्सद्वाच्यतत्वनिष्ठस्य मोक्ष
उपदिश्यते॥ ॥तस्य तावदेव चिरं यावन्न विमोक्ष्ये॥ ॥अथ संपत्स्ये॥ इति। तस्मान्नप्र
धानं जीवश्चात्र सत्पदविषयः। प्रधानकारणवादिनामपि तन्निष्ठस्य मोक्षाभिमतस्या
न्यतात्२ जीवतन्निष्ठस्य च निषेधात् १ शिव एकोध्येयः शिवंकरः सर्वमन्यत्परित्यज्य॥
इति ७ पुनरपि विस्पष्टं हेतुमाह प्रधाननिराकरणे॥ ॥हेयत्वावचनाच्च ८ ॥
यदि प्रधानमेवात्र विवक्षितं तदा तस्य हेयत्वमेवोच्येत। ८ तत्त्वमसि॥ इति मोक्षहेतुतया

१ न च जीवतन्निष्ठस्य निषेधात् इति पा० इदं सत्त्वं शंकरमते॥ हेयत्वावचनाच्च॥ इति चकारेण वगृहीता
र्थमिति न तेन पृथगुपन्यासं सूत्रत्वेनेत्यवगंतव्यं॥

श्रीकंठीय ध्येयत्वमेवोच्यते। ततश्च न प्रधानमिति युक्तं ॥ ८ ॥ किंच: प्रधानपक्षे विरोध इत्याह ॥ ॥
शैवभाष्य प्रतिज्ञाविरोधात् ९ ॥ ॥ इतश्च न प्रधानं सत्पदवाच्यं· एकविज्ञानेन सर्वविज्ञा
२३ नप्रतिज्ञाविरोधात्: सत्पदवाच्यतत्त्वज्ञानेन तत्कार्यतया सकलचेतनाचेतनवस्तुविज्ञा
नं भवति: येनाश्रुतं श्रुतं भवति॥ इत्यादिना प्रतिज्ञायते प्रधानकारणवादे विरुद्धमेतत्
चेतनस्य प्रधानकारणत्वायोगात्: प्रधाने कारणे ज्ञाते ज्ञा अविकारास्पदं तत्कार्यमिदं
च सर्वं ज्ञायते· यथा मृदि ज्ञातायामेव तद्घटादिकं ९ ॥ ॥ ततः कोऽत्र विरोध इत्याशंक्या
ह॥ ॥ स्वाप्ययात् १० ॥ इतश्च न प्रधानं सत् तत्र “स्वप्नान्तं सोम्य विजानी २३
हि यत्रैतत्पुरुषः स्वपिति नाम॥ ॥ तदा सोम्य सता संपन्नो भवति॥ ॥ स्वमपीतो भव
ति॥ ॥ तस्मादेनं स्वपितीत्याचक्षत॥ इति जीवस्य चेतनस्य सता संपन्नस्य स्वाप्ययव च

नात्ः अप्ययः प्रलयः॥१०॥ ॥अचेतने प्रधाने चेतनस्य लयो नयुक्तः। अतो न प्रधानं
सदित्युच्यते। सच्छब्देन परमेश्वर एव सर्वज्ञ प्रतिपाद्यते। न प्रधानमित्याह॥ ॥गतिसा
मान्यात् ११ यथास्मासु उपनिषद्सु सत्सदस्य परमेश्वरवाचित्वं गतिस्तथा श्रुत्यन्तरेऽपि
समानापुरुषो वेदः सन्महो नमो नमः॥ इत्यादौ ११॥ ॥ततः सत्सदवाच्यः परमेश्व
र एवेति मन्त्रमेवास्मासु उपनिषद्सु सत्सदवाच्यादात्मनः सर्वोत्पत्तिः श्रूयत इत्याह॥ ॥
श्रुतत्वाच्च १२ अत्रापि आत्मैवेदं॥ ॥सर्वं सन्मूलाः सोम्येताः प्रजा॥ इत्यात्मन
एव सर्वोत्पत्तिः श्रूयते। ततो जगत्कारणत्वेन सत्सदवाच्यं ब्रह्मैव न प्रधानमिति सिद्धं १२॥
इह ब्रह्मलक्षणस्य जगत्कारणस्य शास्त्रैकसमधिगम्यस्य तानि केप्रधानेऽतिव्याप्तिमाशं
क्याचेतनत्वादिहेतुना यथा तस्मिन्नतिव्याप्तिर्न भवति तथा निरूपितं। अचेतने प्रधाने इव चे

श्रीकंठीय ततेऽपिजीवेतन्नातिव्याममितिवक्तुमधिकरणांतरमारभ्यते आनंदमयोऽभ्यासात् १३
शैवभाष्यं तस्माद्वा एतस्मादात्मन आकाशः संभूतः॥ इत्यारभ्य "तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आ
२७ त्मानंदमयः॥ इति॥ कश्चिदाकाशादिसकलभूतकारणत्वेनान्नमयादिपंचकोशकंचुकांतरति
गू.७ आत्मानंदमयः॥ इत्यानंदवल्लीमाम्नायते॥ तत्रानंदमय आत्मा जीवो वा परमेश्वरो वेति
संदेहः। जीव इति पूर्वपक्षः। तद्धर्माणामत्रोपलंभात्॥ तथाहि॥ पृथिव्या ओषधयः॥ ओषधीभ्योऽन्नं॥ "अन्नात्पुरुषः॥ इत्यादिनापंचकोशाकारं २ शरीरादिकं निरूप्यते॥ तत्र "अ
न्नमयः॥ इति शरीरस्वरूपमात्रमुच्यते॥ प्राणमयः इति तदंतर्वर्ती प्राणः॥ मनोमयः॥ इति तदं २७
तर्वर्ति मनः॥ विज्ञानमयः॥ इति तदंतर्वर्तिनी बुद्धिः॥ आनंदमयः॥ इति सर्वेषामन्नमयादीना
माश्रयो जीव एव॥ अन्नादीनां शिरःप्रभृतिकल्पना समुपासनार्थाः॥ अन्नादीनां ब्रह्मत्वेनोपा

मनात् ततद्वत्वादिसमृद्धिः फलमुक्तं। कथमस्य संसारदुःखसागरमग्नस्य जीवस्यानंदमयत्वाभि
धानमिति चेन्न: अत्रानंदशब्देन परंब्रह्मोच्यते। आनंदो ब्रह्म॥ इति श्रवणात्ः मयट्शब्दस्य
विकारार्थत्वात् तत्कार्यभूतो जीव एव आनंदमय इत्युच्यते: नित्यसंपन्नशिवत्वस्य ब्रह्मण आ
नंदमयत्वांगीकारे॰ अन्नमयप्राणमयविज्ञानमयानंदमया मे शुध्यंतां॥ इति शुद्धिप्रार्थना॰
व्यर्था स्यात्। अतोऽयमानंदमय आत्मा जीव एव न परमेश्वर इति ब्रूमः। आनंदमयोऽयम
त्मा परमेश्वर इति सिद्धांतः। कुतः: अस्यानंदस्य निरतिशयत्वेनाभ्यासात्ः कथमभ्यस्यते:= से
षानंदस्य मीमांसा १ भवति॥ इत्यारभ्य मानुषविशेषादिप्रजापतिपर्यंते तततदानंदस्योपर्युप॰
रि शतगुणमतिशयमभिधाय॰॰ स एको ब्रह्मण आनंदः॥ इति ब्रह्मानंदस्यास्य निरतिशयपरि
रस्कृतत्वेनाभ्यासात् २ तदेतन्निरतिशयानंदभाजनत्वमस्य संसारिणो न संभवति: यदुक्तं: आनं

१ आनंदमयस्येश्वरत्वे नित्यशुद्धस्य तस्य कथं विशुद्धिप्रार्थना॥ इति। तत्रेदमुत्तरं। यथा प्रकृष्टप्रकाश
शो भास्वान् स्वचंद्रस्य तिरोधायकघनापगम एव प्रसादस्तथा नस्य नित्यशुद्धस्य तिरोधानमलापनयन
२५ मेव शुद्धिः। तस्मादानंदमयः परमेश्वर एव॥१३॥ ॥ नन्वानंद एव ब्रह्मेत्युच्यते। तद्विकार आ
नंदमयः। मयटो विकारार्थत्वात्। आनंदमयस्येश्वरत्वाभ्युपगमे ब्रह्मणोऽन्य ईश्वर इति प्रा
प्तिः। तथापि तस्य विकाररूपत्वादनित्यत्वमित्याशंकायामाह॥ ॥विकारशब्दान्नेति
चेन्न प्राचुर्यात्॥१४॥ अन्नमयादीनां यथान्नादिविकाररूपत्वं तथानंदमयस्यानंदवि
कारः। यथा मृद्विकारो मृन्मयो घटादिः। अतो निर्विकारस्य परमेश्वरस्य विकारासंभवादयं २५
जीव एवेति चेन्न। मयटः शब्दस्यात्र प्राचुर्यार्थत्वात्। अन्नमयप्राणमयमनोमयपर्यंतमेव वि
कारार्थः। विज्ञानमयो विज्ञानप्रचुरो जीवः। आनंदमयोऽप्यानंदप्रचुरः परमेश्वरः॥१४॥ ॥

१ मीमांसासारस्वतीभवतीइति पा० २. ब्रह्मानंदो निरतिशयत्वेनाभ्यस्यते इति पा०

सर्वथाविकारप्रकरणपठितत्वाद्विकारार्थएवसमुचितामयट्शब्दस्तत्राकांक्ष्याह॥ ॥
तद्धेतुव्यपदेशाच्च १५॥ ॥एषह्येवानंदयाति॥इतिजीवान् प्रत्यानंदहेतुतयानंदमयः
श्रूयते:स्वयंप्रचुरानंदोहिपराननानंदयति: अतःपरमेश्वरएवानंदमयःऽआनंदप्रचुरःपर
मेश्वरस्त्वानंदमयइत्युक्तेऽपिब्रह्मणोऽन्य एवायमितिगम्यते॥१५॥ ॥ब्रह्मपुच्छंप्रतिष्ठा॥
इतिब्रह्माधारत्वेनास्यावगमात् परमेश्वरादन्यत्वांगीकारेब्रह्मणःस्वातंत्र्याज्जगत्कारण-
त्वायसंभवःऽअतोजीवपक्षएवसमीचीनइत्यतआह॥ ॥मांत्रवर्णिकमेवचगीयते१६
॥ ॥यतः सत्यंज्ञानमनंतंब्रह्म॥इतिमंत्रवर्णोदितंब्रह्मततोऽन्योऽन्तरआत्मानंदमयइ-
त्यानंदप्रचुरतयानंदमयइतिगीयते ब्रह्मपुच्छंप्रतिष्ठा॥इतिब्रह्मशब्दस्यैववाचकःत
स्यपरमेश्वरवाचकत्वादाधारत्वं॥ ॥अत्रकेचिदाहुः परमाकाशरूपप्रकृत्यात्मानंदमय॥

श्रीकंठीय इतिश्रूयते॥ नविश्वाधिकंनिमित्तंपरंब्रह्म॥ यत्॥ सत्यंज्ञानमनंतंब्रह्म॥ इत्युच्यते॥ ९ तस्मा
शैवभाष्ये द्वाएतस्मादात्मन आकाशः संभूतः॥ इत्याकाशादिप्रपंचप्रकृतित्वेनश्रुतेः आनंदमयः परमा
२६ काशः॥ परमाकाशरूपत्वमस्य ९ यदेष आकाश आनंदोनस्यात्॥ इत्युक्तोवगम्यते॥ ब्र
ह्मपुच्छंप्रतिष्ठा॥ इतिब्रह्मास्यानंदाकाशस्याधारत्वेनावगम्यते॥ अतएवसएकोब्रह्मण
आनंद इतिब्रह्माश्रितत्वेनावगम्यते॥ पुनरेषएव॥ आनंदोब्रह्मेतिव्यजानात्॥ ९ आ
नंदाद्ध्येवखल्विमानिभूतानि॥ इत्यादिना सकलभूतप्रकृतित्वेनाभिधीयते॥ तत्रानंदोब्रह्मे
त्यस्यानंदस्यब्रह्मत्वेव्यपदेशस्तुब्रह्मणोधर्मत्वेनतदभेदात्॥ ९ सैषाभार्गवीवारुणीविद्यापर २६
मेव्योमन्प्रतिष्ठिता॥ इतिब्रह्मधर्मस्वरूपेपरमानंदरूपेप्रपंचप्रकृतौपरशक्तिपर्यायेचिदानं
दात्मनिपरमेव्योम्निवारुणीविद्यासमाप्तेत्युच्यते॥ ततोब्रह्मधर्मस्वभावः प्रकृत्यात्मापरमा

१ ब्रह्मानंदा इति पा०

काशरूपपरशक्तिरत्रानंदमयइत्युच्यतेऽ तद्धर्मित्वेनप्रतिष्ठेत्युच्यतेपरंब्रह्म: विज्ञानमयश्चतदु
पासकोजीवःऽप्रतिष्ठाभूतादधर्मिणोब्रह्मणोधर्मभूतस्यानंदमयस्यशक्त्यात्मनोभेदादर्शना
द्धानंदरूपम आत्माब्रह्मेत्यभिप्रायेण ॥ आनंदमयोऽभ्यासात् ॥ इतिसूत्रकारेणसूत्रमवतारित
मिति ॥ ॥ अन्येपुनः ॥ अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रम्य ॥ इत्यादावन्न
मयादीनांप्रत्येकंचेतनवाचकात्मश्रुतिसंबंधात् संसारलोकादुत्क्रांतस्यमुक्तस्यक्रमप्राप्यतया
वगम्यादेतेसर्वेऽप्यन्नमयादय आत्मानःपंचचेतना अन्नाद्यनुमितपंचभूताधिष्ठातारःकारण
भूतपुरुषा ब्रह्मविष्णुरुद्रेश्वरसदाशिवसंज्ञा अन्नमयाद्यात्माधारस्यसदाशिवस्यानंदमय-
स्यापिकारणमूर्तिपरमशिवाख्यंब्रह्मतत्प्रतिष्ठेत्युच्यतेऽ तदभेदादानंदमयस्य ब्रह्मत्वव्यपदेश
इतिसर्वथानंदमयःपरमेश्वरइतिसिद्धं ॥ ॥१६॥ ब्रह्मणःपरमशिवस्यसमन्वयसिद्धंजगत्का

रणत्वादिकं लक्षणं प्रधानजीवयोर्न व्यभिचरतीति स्थापितं अतः परं जीवसमष्टिरूपस्य हिरण्य
गर्भस्य जगत्कारणत्वादिकं श्रूयत इत्यत आह॥ ॥नेतरोऽनुपपत्तेः १७॥ ॥यतः प्रसू
ता जगतः प्रसूती तोयेन जीवान् विससर्ज भूम्यां। यदोषधीभिः पुरुषान् पशूंश्च विवेश भूतानि
चराचराणि॥ ॥इति श्रूयते महोपनिषत्स्य विषयः। अत्र सकलजगत्प्रसूत्यादिहेतुत्वेन श्रू
यमाणः पुरुषः परमेश्वर उतान्यो वेति संदेहः। हिरण्यगर्भ इति पूर्वपक्षः। कथं तल्लिंगातः।=ए
कार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः। भोगिशय्यागतः शेते त्रैलोक्यग्राससंबृंहितः॥ ॥इति
पुराणवचनाद् ब्रह्मणः समुद्रशायित्वमवगम्यते। तदिह श्रूयते तल्लिंगात्। ९यमंतः समुद्रे कव 
यो वयंति॥ इति ॥ प्रजापतिश्चरति गर्भेऽन्तः॥ इति। स एवोपक्रमे सर्वानुप्रविष्टतयावगम्यतेऽ
उपसंहारे च॥ सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं च॥ इत्यादिना तस्यैव का

१ स्यांतरत्वावकाशसिद्धसर्वधर्मोपपत्तिः इति पा०।

रणत्वमवगम्यते ॥ तस्मादुपक्रमोपसंहारसिद्धस्य हिरण्यगर्भस्यानंतरसिद्धधर्मोपपत्तिः ९॥ ॥
किंच । नमुतिपादनप्रदेशांतरोपसंहारश्च कृतः ॥ अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ ॥ इति ॥ अ
द्भ्यः संभूत ॥ इति तत्र प्रजापतिरेव प्रतिपाद्यः ३ ॥ प्रजापतिश्चरति गर्भे ॥ तरजायमानो बहुधा व्य
जायत वै हिरण्यगर्भे ॥ इति श्रवणात् ॥ ततो हिरण्यगर्भः स एव जगत्प्रसूतिहेतुत्वादिना प्रति
पाद्यत इति मा मैवं मंस्थाः । शिवपरमेश्वरादितरो भिन्नो हिरण्यगर्भो ऽत्र न प्रतिपाद्यः जगत्प्रसूतिहे
तुत्वादीनां परमेश्वरधर्माणां तस्मिन्ननुपपत्तेः ५ यतः प्रसूता जगतः प्रसूती ॥ इत्यारभ्य जगत्प्रसू
तिहेतोस्तस्य ॥ ॥ अतः परं नान्यदणीयसं हि परात्परं यन्महतो महांतं ॥ यदेकमव्यक्तमनंतरू
पं विश्वं पुराणं तमसः परस्तात् ५ ॥ इत्यादिना सर्वोत्कृष्टत्वं तमसः प्रकृतिमंडलात्परत्वं चावगम्य
तेः तत्तश्चांडांतर्वर्तिनो हिरण्यगर्भस्य न संभवति ॥ ॥ किंच ॥ य एनं विदुरमृतास्ते भवंति ॥ इत्य

श्रीकंठीय स्वज्ञानादमृतत्वं मुक्तिरभिधीयते ॥ तत्र हिरण्यगर्भे संभवति परमेश्वरस्य हि मुक्तिहेतुत्वमसाधार
शैवभाष्यं णलिंगः ॥ ॥ यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः । तदा शिवमविज्ञाय दुःखस्यांतो भ
२८ विष्यति ॥ इति श्रवणात् ॥ यदुक्तं उपक्रमोपसंहारसिद्ध ॥ इति । तदप्रयोजकं ॥ अनुपपन्नात्प्र
जापतिधातृशब्दो हिरण्यगर्भं विहाय प्रजानां पतिं जगद्धातारमेकं परमेश्वरमेव प्रतिपादय
तः ॥ अप्स्वयः संभूतो हिरण्यगर्भ ॥ इत्युभयत्रापि परमेश्वर एव प्रतिपाद्यः ॥ य ईशेऽस्य द्विपद
श्चतुष्पदः ॥ आदित्यवर्णं तमसः परस्तात् ॥ इति विश्वेश्वरत्वविश्वातीतत्वतल्लिंगात् ॥ ततो
जगत्कारणत्वादिना प्रजापतिशब्दवाच्यः परमेश्वरो न हिरण्यगर्भः ॥ १७ ॥ ॥ परमेश्वरेण हि २८
रण्यगर्भस्याभेदाज्जगत्कारणत्वमस्तीत्यत आह ॥ ॥ भेदव्यपदेशाच्च ॥ १८ ॥ ॥
अस्यां महोपनिषदि परमेश्वरेण हिरण्यगर्भस्य भेदो व्यपदिश्यते कारणकार्यत्वेन ॥ यो दे

कामाद्यनानुमानापेक्षा १८

वानांप्रथमंपुरस्तात् विश्वाधिकोरुद्रोमहर्षिर्हिरण्यगर्भःपश्यतिजायमानं॥ इति॥ अतोहिरण्य
गर्भादेः सर्वप्रपंचस्यकारणत्वमीश्वरस्येतिसिद्धं॥ ॥पुनराशंक्याह॥ प्रजापतिरकामयतप्र
जाःसृजेयेति॥ इतिसर्वश्रुतिषु १ संकल्पोहिरण्यगर्भस्यजगत्स्रष्टृत्वेश्रूयते तथापितस्यज-
गत्कारणत्वेऽनुमानापेक्षानास्ति ३ तस्यकामस्यावांतरसृष्टिविषयत्वात्॥ परमेश्वरस्यैव
हिरण्यगर्भात्मनावांतरसृष्टिश्च॥ ३ इतिवक्ष्यति॥ संज्ञामूर्तिक्लृप्तिंस्तुत्रिवृत्कुर्वत॥ इति॥
अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणि ० इतिहिरण्यगर्भरूपेणात्मनाप्रपंचांत
प्रविष्टस्यपरमेश्वरस्यनामरूपकर्तृत्वश्रवणात् १८ अनयोरभेदएवाभ्युपेयइत्यतआह
॥ ॥अस्मिन्नस्यचतद्योगंशास्ति २०॥ ॥अस्मिन्नुपनिषत्तत्र ५ एवास्यहिरण्यगर्भस्य
तद्योगंतस्यपरमेश्वरस्यशेषत्वसंबंधंशास्तिमंत्रभागः॥ = ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः॥

श्रीकंठीय इति। अतः परमेश्वर एव जगत्कारणं तच्छेषभूते हिरण्यगर्भे इति सिद्धं ॥२०॥ ॥ तदित्थं पू-
शैवभाष्यं र्वैरधिकरणन्यायैः सर्वज्ञं नित्यत्वमनादिबोधं स्वतंत्रमलुप्तशक्तिमनंतशक्तिकं सकल-
२७ जगदुभयकारणं समस्तोपनिषत्तंत्रसमन्वयैकप्रतिपाद्यं स्वप्रकाशं निखिलप्रपंचादिशून्य-
द्वितीयस्वभावं सच्चिदानंदस्वरूपं संसारपाशविच्छेदकारणं चिदचिदर्थांतरं शिवतत्त्वं ब्रह्म
इति सिद्धं। तस्य साधकानां संसारभेषजं मनःसमाधानयोग्यं किमपि रूपं प्रदर्शयितुमिदम-
धिकरणमारभ्यते॥ "य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्य-
केश आप्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी" इति छांदो- २८
ग्ये श्रूयते। स विषयः। अयमादित्यांतर्वर्ती हिरण्मयपुरुषः परमेश्वरो देवताविशेषो वेति सं-
शयः। एवं सति सर्वाधारस्य सर्वगतस्य परमेश्वरस्यादित्यांतर्वर्तित्वं हिरण्मयरूपत्वं च न संभ-

१ स कामयत प्रजापयेयेति। प्रजाः सृजेयेति सर्वत्र श्रुतिषु इति पा० २ स्याहिरण्यगर्भात्मनोऽवांतरस्रष्टृ-
त्वा॥ इति वरपा०॥२॥ एतदपेक्षा नास्ति इति पा० ४ प्रथमजीवरूपहिरण्य इति पा०॥५॥ सन्न इति पा० ६
पूर्वमतीते इति पा०॥

वति॰ स्वेच्छया स्वांगीकारे त्रिलोचनत्वनियतं १ तदिह न विद्यते॥ पुंडरीकमेवमक्षिणी॥ इति
लोचनद्वयमेव श्रूयते॥ अथवा स्वेच्छागृहीतोऽपि देहः संसारिणामिव परमेश्वरस्यापि दुःख
मुत्पादयेदेव॥ स्वेच्छासंबंधेऽपि पावकस्य दाहकत्वं हि स्वभावः २ अतः परमेश्वरस्य शरीरसं-
बंधो न युक्तः ३ तस्मादयं कश्चिद्देवताविशेष एव॥ न परमेश्वरः॥ इति पूर्वपक्षन्यायः॥ ॥
सिद्धांतस्तु॥ परमेश्वर एव॥ कुतः॥ तद्धर्माणामुपदेशात्॥ स एष सर्वेषां लोकानामीष्टे॥ ४ स
र्वेकामनां॰ तस्योदिति नाम॥ स एष सर्वेभ्यः पाप्मभ्य उदितः॥ इत्यादिना प्रतिपादिताः सर्व
लोककामेश्वरत्व सर्वपापराहित्यादयो धर्मा हि पारमेश्वराः॥ एको रुद्रो न द्वितीयाय तस्थुः
सर्वाल्लोकानीशत ईशनीभिः॥ अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥ ए
को बहूनां विदधाति कामान्॥ इत्यादिश्रवणात् सर्वाधारस्य सर्वगतस्यादित्यांतर्वर्तित्वं तत्सं

श्रीकंठीय भवति॥ इतियदुक्तं। तत्रनविरोधः॥ सर्वाधारः सर्वगतः परमेश्वरः साधकानुग्रहायहिरण्ययंकि
शैवभाष्यं मपिरूपंसमास्थायसवितृमंडलमधिवसति। शरीरसंबंधादस्मदादिवदीश्वरस्यनसंसारदो
३० षापत्तिः॥ श्रुतिरेवभगवतीह्यस्यशरीरसंबंधंसर्वपापराहित्यंचप्रतिपादयति। वयंहिश्रुतिप्रा
माण्यशरणानयुक्तिंबहुमन्यामहे॥ पावकोऽपिसंबंधाच्छक्तिमतोदाहकः॥ यथाकप्यासंपुंडरी
कमेवमक्षिणी॥ इतित्रिलोचनस्यपरमेश्वरस्यलोचनद्वयग्रहणंपुंडरीकसादृश्यवर्णनार्थं।
नतृतीयलोचनाभावद्योतनपरं॥ तथाहि। त्रिपुत्रेब्राह्मणंप्रतिद्वौपुत्रावस्याग्निकसावित्युक्ते
द्विसंख्याग्रहणंनशेषपुत्रनिषेधपरं। किंतुपुत्रद्वयस्याग्निसादृश्यपरं॥ तद्वदत्रापि॥ कमुदकं ३०
रश्मिभिः पिबतीतिकपिरादित्यः॥ तेनासितंविकसितंपुंडरीकंयथास्फुरति। तथापरमेश्वरस्य
लोचनद्वयं॥ तृतीयंलोचनंतुमुकुलितस्वभावंविकसितपुंडरीकसदृशंनभवति॥ मुकुलितपुंड

शैकसममित्यभिप्रायः ३ ९९ असौ यो ऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्रन्न्
अदृश्रन्नुदहार्यः । उतैनं विश्वा भूतानि । स दृष्टो मृडयाति नः । उतैनं गोपा अदृश्रन्न् अदृ
श्रन्नुदहार्यः । उतैनं विश्वा भूतानि । स दृष्टो मृडयाति नः । इतीति ॥ २१ ॥ ॥ नीलग्रीवस्य
परमेश्वरस्य सर्वभूतप्रत्यक्षादित्यत्वावगमात् । स्वस्वाहितमंडलस्थिनेत्रो रविः । इति त-
स्य त्रिलोचनावगतेश्च । आदित्य एव प्रत्यक्षः परमेश्वरः प्रभामंडलमध्यवर्ती । अन्यथा
कथमस्य । नीलग्रीवो विलोहितः इति नीलग्रीवत्वं त्रिलोचनत्वं चोच्यते । असावादित्यो ब्र
ह्म । इति श्रुतिषु ब्रह्मत्वव्यपदेशाच्च । तस्मात् ॥ अंतरादित्य ॥ इति प्रद्योतनरूपमंडलांतर्वर्तिह-
य एव हिरण्मयः पुरुषः । इत्यत आह ॥ ॥ भेदव्यपदेशाच्चान्यः ॥ २२ ॥ ॥ मंडला-
भिमानिनो ऽसावेतनरूपादादित्यादन्य एव हिरण्मयपुरुषः परमेश्वरः । भेदव्यपदेशात् ।

श्रीकंठीय यआदित्येतिष्ठन्नादित्यादंतरो यमादित्योनवेद यस्यादित्यःशरीरं यआदित्यमंतरो
शैवभाष्यं यमयति एषतआत्मांतर्याम्यमृतः इति; अत्रामृतशब्देनशिवउच्यते; एतानिहवाअ
३१ मृतस्यनामधेयानि इतिशतरुद्रीयप्रशंसापरजाबालोपनिषद्वचनात् आदित्याभ्यंतर एव
परमेश्वरस्यतदविदितत्वादिधर्मैर्व्यपदिश्यते; तस्मादादित्याच्चेतनादन्यईश्वरोहिरण्मयपु
रुषः नीलग्रीवोविलोहितः॥ इतिनीलग्रीवःपरमेश्वरः एवादित्यांतर्वर्तीप्रतिपाद्यते; तदात्मन
यातद्रूपस्वाम्यतः॥ ॥ ननुननीलग्रीवःपरमेश्वरस्त्वादित्यांतर्वर्ती किंतुनारायणएव; तथा
हिसर्वेलौकिकाःपठंति॥ ॥ध्येयःसदासवितृमंडलमध्यवर्ती नारायणःसरसिजासन ३१
संनिविष्टः॥ इतितस्यैवपुंडरीकसदृशाक्षिरूपसंबंधोयुक्तः; पुंडरीकाक्षइतिप्रसिद्धेः; किम
न्यथाप्रतिपादनप्रयासेन; इतिचेन्न; परमेश्वरासाधारणलिंगानांहिरण्मयपुरुषेदृश्यमाना

१ गटत्वमाणानांइतिपा०

नां १ तस्मिन्नारायणेऽनुपपन्ने ॥ तथाहि । सर्वविषयस्य संदिग्धस्यास्य वाक्यस्य संदिग्धे वीक्षा
नरे निर्णयो युक्तः ॥ महोपनिषदि श्रूयते ॥ आदित्यो वा एष एतन्मंडलं तपति ॥ इत्यादि ॥ तत्र ॥
य एष एतस्मिन्मंडलेऽर्चिर्दीप्यते १८ इति मंडलप्रभामुक्त्वा ॥ य एतस्मिन्मंडलेऽर्चिषि पुरुषः २१ इ
ति मंडलाभिमानिनं सूर्यमभिधाय ॥ य एषोंऽतरादित्ये हिरण्मयः पुरुषः ७ इति हिरण्मयं पुरु
षमादित्यांतर्यामिणं २ मुक्त्वा पुनः ॥ आदित्यो वै तेज ओजो बलं यशः ॥ इत्यादिना तस्यादित्यरू
पस्य विभूतिमभिधाय ॥ एष एव पुरुषः ॥ स एष भूतानामधिपतिः ७ इति भूतपतित्वेन तं निर्दिश्य पु
नः कीदृशः ६ इत्याकांक्षायां ॥ सर्वो रुद्रः ॥ इत्यारभ्य ॥ हिरण्यबाहवे हिरण्यपतये ऽंबिकापत
य उमापतये ७ इत्युपसंहृतेः तत्र बाहुग्रहणस्योपलक्षणत्वात् हिरण्यरूप इति तात्पर्यं ॥ अतो
हिरण्यसहस्ररूप उमापतिरादित्यमंडलवर्तीति सिध्यति ॥ अत्र नीलग्रीववत्त्वमुमापतित्वमित्या

द्विविरोलिंगं परमेश्वरादन्यत्र तस्यायोगात्ः पुंडरीकाक्षत्वं सामान्यलिंगं नारायणस्य
दृष्टत्वात्तत्रापि न स्वदर्शनीतः कमललोचना नारीकमललोचनः पुरुष इति अतो विशेष
लिंगेन सामान्यलिंगस्य बाधो विधेयः ३ सर्वेत्मादिलौकिकवचनं भाक्तमेवः ततो हिरण्य
सहस्ररूपाक्षिलोचनो नीलग्रीव उमापतिः सकललोककामेश्वरः सर्वपाप्मानां प्रांतो
भगवान्परमेश्वर आदित्यांतर्वर्ती सावित्रीप्रतिपाद्यः सर्वेषां मुमुक्षूणां ध्येय इति सिद्धं
२२॥ ॥सर्वज्ञत्वादिधर्मकस्य परब्रह्मणः शिवस्य परममंगलास्य स्वगुणसंस्थ्य समभिधा 
पतद्ब्रह्मणस्य नारूपवशाब्दत्वानि आमि शंकायामधिकरणमारभ्यते॥ ॥आका
शस्तल्लिंगात् २३ अत एव प्राणः २४॥ ॥छांदोग्ये श्रूयते॥ सर्वाणि ह
वा इमानि भूतान्याकाशादेव समुत्पद्यंते। आकाशं प्रत्यस्तं यंति॥ ५ सर्वाणि ह वा इमानि भू

१ तत्रादित्यमंडलेत्रयीमये ऽर्चिर्दीप्यन इति पा० ३ त्वर्वोमिन इति पा० २ मुतत्वाचिविपुरुष इति मंड
लाभिमानी सूर्यो नरादित्य इति पा० ४ शः पुरुष इति पा०

तान्याकाशादेव समुत्पद्यंते। आकाशं प्रत्यस्तं यंति ॥ ७ सर्वाणि ह वा इमानि भूतानि प्राणमे
वाभिसंविशंति। प्राणमभ्युज्जिहते ॥ इति ॥ अत्र सकलभूतोत्पत्तिप्रलयकारणप्रतिपादकौ
१ प्राणाकाशशब्दौ परमेश्वरप्रतिपादनपरौ किं वा भूताकाशप्राणवायुप्रतिपादनपराविति
ति संदेहः ॥ = प्राणाद्ध्येव खल्विमानि भूतानि जायंते। प्राणेन जातानि जीवंति। प्राणं प्रयंत्य
भिसंविशंति ६ इत्यादिश्रुतेः ॥ ६ आकाशाद्वायुः ७ इत्यादिश्रुतेश्च। प्राणाकाशयोः सकल
भूतकारणतावगमात् तावेवात्र प्रतिपाद्याविति प्राप्ते ब्रूमः ॥ प्राणाकाशशब्दाभ्यां परमेश्व
र एव। सर्वकारणत्वादितल्लिंगात् २ न ह्यनयोः सर्वकारणत्वादिकं संभवति। तत्रानंदरूप
स्य ब्रह्मणः कारणत्वादेस्तात्पर्य ७ प्राणाद्ध्येव खल्वि ७ इत्यादिश्रुतेः ॥ न प्राणस्य कारणत्व
वादेः किं तु तदवरमात्रं आकाशस्य भूतांतर्वर्तितया सर्वशब्देन ग्रहणात् सर्वभूतानां कारण

१ इतिप्रतिपादनपरौ इति पा० ॥ २ त्वादिरूपः तल्लिंगात् इति पा० ॥

श्रीकंठीय त्वं तद्भूताकाशयोरिति सिद्धांतः ॥ ॥ ननु भूताकाश इत्युपपद्यग्रहणेनाकिमिति चेत्
शैवभाष्यं परमाकाशस्य परमस्य निरूपणस्य सर्वभूतकारणत्वसम्भावनात् १ समयोजने नहि परमेश्वरद्
३३ निकर्षनिर्णयः ॥ अतद्भेदात् ॥ इति सिद्धं २२ २४ पूर्वं निखिलभुवननायकस्य निरस्तदोषगा
न्धाकलंकस्य निरतिशयमांगल्यरत्नाकरस्योमापतेः परब्रह्मण आदित्यमंडलमास्पदमि
ति निरूपितं नहि तत्सर्वस्यान्तरमुच्यते ॥ ॥ ज्योतिश्चरणाभिधानात् २५ ॥ ॥
छंदोग्ये श्रूयतेऽस्य विषयः ॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु
उत्तमेषूत्तमेषु इदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिः ७ इत्यादि अत्र सकललोकव्यापित ३३
या दिवि श्रूयमाणं परं ज्योतिः परमेश्वर एवान्यो वेति संशयः ॥ द्योशब्दस्याकाशवाचित्वात् ॥
परो दिव ॥ इत्याकाशवर्तीसर्वेषु वा न्नम्रति पद्यते ज्योतिरिति ॥ अथवा ८ अंतः पुरुषे ज्योतिः ७ इति

सर्वो नरं परं पुरुषांतर्वर्त्तित्वाज्जाठरोऽग्निरिति पूर्वपक्षः ॥ सिद्धांतस्तु ॥ परो दिवो ज्योतिः ॥ इति स
र्वो नरं परं ज्योतिः परमेश्वर एव ॥ पूर्वत्र ॥ पादोऽस्य सर्वा भूतानि ॥ इति ज्योतिषोऽस्यैकांशतया वि
श्वभूतानामभिधानात् ॥ नैतत्संभवति जाठराग्निसूर्ययोः परिच्छिन्नत्वात् ॥ २५ ॥ ॥ पूर्वे २ ॥
गायत्री वा इदं सर्वं भूतं ॥ इति सर्वात्मकतया गायत्रीमभिधपद्यते ॥ प्रकरणात् तदेकांशत्वमेव प्रपं-
चस्य ॥ पादोऽस्य सर्वा भूतानि ॥ इति श्रुतिराह ॥ इत्यत आह छंदोऽभिधानान्नेति चेन्न ॥ तथा चेतोऽ
र्पणनिगदात् ॥ तथा हि दर्शनं २६ ॥ ॥ पूर्वे ८ ॥ गायत्री वा इदं सर्वं भूतं ॥ इति छंदसोऽभिधाना
त् २ तस्यैवात्राभिधानं ॥ न परमेश्वरस्य इति चेत् ॥ नैतत्संभवति ॥ गायत्र्याख्यस्य छंदोमात्रस्य स
र्वभूतात्मकत्वं ॥ किंतु सावित्र्यानुगमानोपदेशः परमेश्वरस्य क्रियते ॥ यथा गायत्री षडक्षरैश्चतु-
र्भिः पादैश्चतुष्पादा ॥ तथा ब्रह्मापि चतुष्पादिति ॥ तथान्यत्रापि छंदोऽभिधायी शब्दः सादृश्यादर्थो

श्रीकंठीय
शैवभाष्यं ।
२६

नरेप्रयुज्यमानो दृश्यते ॥ यथा संवर्गविद्यायां ॥ तेषा एते पंचान्ये दश संतस्तत्कृतं ॥ इत्युपक्रम्य ॥
सैषा विराट् ॥ इत्युक्तेः ॥ तथा च सर्वात्मकतया ॥ परमेश्वरस्य लिंगेन गायत्रीशब्दकरणबाधः ॥ अ
तः परमेश्वर एव ज्योतिरिति २६ पुनरनुपपत्तिमाह ॥ ॥ भूतादिपादव्यपदेशोपपत्तेश्चै
वं २७ भूतपृथिवीशरीरहृदयैश्चतुष्पदेति व्यपदेशो न गायत्र्याश्छंदसुपपद्यते परमेश्वर
एवोपपद्यते २७ ॥ ॥ पुनराशंक्य परिहरति ॥ ॥ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्य
विरोधात् २८ ॥ ॥ ननु ॥ पादोऽस्य सर्वा भूतानि ॥ इति ॥ त्रिपादस्यामृतं दिवि ॥ इत्यत्र द्यु
संबंधमतभिज्ञानाज्ज्योतिर्वाक्ये परमेश्वरः ॥ प्रतिपाद्यत इति न सारः उपदेशभेदेन विरोधात् २६
॥ त्रिपादस्यामृतं दिवि ॥ इति परो दिवो ज्योतिः ॥ इति विभक्तिभेदेनोपदेशभेदः ॥ अतो विरोध
इति चेन्न ॥ उभयत्रापि विरोधाभावात् यथा वृक्षाग्रे श्येनः ॥ वृक्षाग्रात्परः श्येन ॥ इति व्यपदेशः ॥

अत्रोभयत्रापि दिवः परत्वमेव विवक्षितं । अनेन लिङ्गेन परमेश्वर एव पुरुषसूक्तोदितः पु
रुष इति सिद्धः । पादोऽस्य विश्वा भूतानि ॥ इत्यत्रापि भूतवर्णनात् । अतो निजैकांशमात्रेण सकल
प्रपंचं दिवि दीव्यमानं परंज्योतिः परमेश्वर इति निर्णयः ॥ २७ ॥ ॥ भगवत्सवितृमंडले साक्षा
दुपास्यतया निर्दिष्टस्य परमेश्वरस्यास्मिन्नधिकरणे विश्वात्मकत्वमुक्तं । तदात्मकतया त
दन्येषामुपास्यत्वं नान्यथेति प्रतिपादयितुमिदमधिकरणमारभ्यते ॥ ॥ प्राणस्तथानुगमा
त् २८ ॥ ॥ अस्य कौषीतकोपनिषदि विषयः श्रूयते ॥ ॥ प्राणोऽस्मि प्रज्ञात्मा तं मामायु
रमृतमुपास्व । इतीदं वचनं विषयः । अत्रोपासनाविधिविषयत्वेन प्राणशब्दसामानाधिकरण्ये
न निर्दिष्टं जीवपरमेश्वरो वेति संशयः । २८ ॥ प्राणोऽस्मि प्रज्ञात्मा तं मां इति प्राणशब्दस्य सा
क्षादिंद्रेण सामानाधिकरण्यमवगम्यते ॥ मामुपास्व । इति तद्विषय एवोपासनाविधिः श्रूयते ।

१ इत्यत्र गायत्र्यौपनिषदनमुचितं परमेश्वरः इति पा० । २ विरोधात् प्रत्यभिज्ञानासिद्धेः ॥ =त्रिपाद
स्यामृतं दिवि ॥ इति विभक्ति- इति पा०

श्रीकंठीय तस्यप्राणत्वंश्रुतिहृद्गणसकलरक्षकत्वादुपपद्यते॰ सकलोपास्यत्वंचपरमैश्वर्यवत्त्वादु
शैवभाष्यं॰ पपन्नं॰ तथाहिश्रुतिः॰ इंद्रोराजाजगतोयईशः॥ इत्यादि॰ तस्मादिंद्रएवोपास्यतयानिर्दि
३५ श्यतइतिपूर्वपक्षः॥ सिद्धांतः परमेश्वरइति॰ कुतः॰ आनंदाजरामृतप्रज्ञात्मादीनांतदसा
धारणधर्माणामस्मिन्प्राणशब्दनिर्दिष्टे॰ अनुगमात्॰ एषप्राणएवप्रज्ञात्मानंदोऽजरो
ऽमृत॥ इति॰ यदुक्तं॰ इंद्रोराजा॰ इतिश्रुतिः॰ तत्रेंद्रशब्दईश्वरविषयःप्रकरणादवगम्यते
२९ अथशंकापरिहरति॥ ॥नवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमाह्यस्मिन् ३०
॥ ॥नायमुपास्यःपरमेश्वरः उपक्रमे॰ मामेवविजानीहित्रिशीर्षाणंत्वाष्ट्रमहनं॰ ३५
इत्यादिनाप्रज्ञातजीवभावसंद्रत्वोपदेशात्॰ अतउपसंहारस्तदनुगुणोनेतव्यइतिचेत्॰
नैतद्युक्तं॰ उपक्रमादारभ्यास्मिन्प्रकरणे॰ अध्यात्मसंबंधस्यपरमेश्वरधर्मस्यबाहुल्यात्॰

१ उपक्रमे इत्येवपा॰ २ अस्मिन्निंद्रशब्दवाच्ये इतिपा॰॥

तथाहि॥ उपक्रमे तावत्॥ यत्त्वं मनुष्याय हिततमं मन्यसे॥ इति हिततमोपासनं प्रारब्धं॥ तत्र
तावत् परमेश्वरधर्मः। तदुपासनस्यैव मोक्षसाधनस्य हिततमत्वात्॥ मध्ये च॥ एष ह्येव सा-
धुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते॥ एष ह्येवासाधुकर्म कारयति तं यमेभ्यो
लोकेभ्यो ऽधो निनीषत॥ इति सर्वकर्मकारयितृत्वं श्रूयते॥ तथा॥ तद्यथा रथस्यारेषु नेमिरर्पि-
ता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे ऽर्पिताः॥ इ-
ति जडचेतनात्मकसकलप्रपंचाधारत्वं श्रूयते॥ तच्च परमेश्वरधर्मः॥ अतः परमेश्वरधर्मबाहुल्या-
दिहोपास्य इंद्रो[1] न भवति॥३०॥ ॥कथमिंद्रो[2] जीवत्वादनुपास्यो ऽपि स्व[3]विषयमुपदिश-
तीत्याशंक्याह॥ ॥शास्त्रदृष्ट्या तूपदेशो वामदेववत्॥३१॥ ॥अनेन जीवेनात्मनानुप्र-
विश्य नामरूपे व्याकरवाणि[4] इत्यादिशास्त्रदृष्ट्या सर्वशब्दवाच्यत्वात् परमेश्वरस्य स्वशरी-

१ बाहुल्यादयमिंद्रशब्दवाच्य इंद्रो इति पा०। २ कथमयं इति पा०। ३ स्वस्वरूपतया इति पा० ४ भेद इति पा०

श्रीकंठीय कृतया रुद्रशब्दवाच्यं परमेश्वरमेवोपास्यत्वेनोपदिष्टवानिंद्रः ॥ अत इंद्रशब्देनोपदेशः प
शैवभाष्यं रमेश्वरस्य ॥ दृष्टांतमाह ॥ वामदेवो हि स्वस्य परमेश्वरात्मत्वदृष्ट्या ॥ अहं मनुरभवं सूर्यश्चाहमित्यु
२६ पदिदेश ॥ तद्वदिंद्रोपदेशः ॥ अथवा वेदांतविज्ञानोपलब्ध्या ब्रह्मात्मसामरस्यभावनया
ब्रह्मभावमुपगतस्य विगलितमनुष्यादिदेहविषयकल्पिताहंभावस्य कोपि संपन्नविश्वा
कारपराहंभावस्य वामदेवस्यात्मनः सर्वगतत्वावगमान्मनुसूर्यादिरूपं वभावोक्तिः ॥ एवमि
द्रस्यापीति निश्चीयते ॥ प्राणोस्मि प्रज्ञात्मा ॥ इति प्राणशब्देन परं ब्रह्मोच्यते ॥ तस्यानंदरूपत्वे
न सकलप्राणनहेतुत्वात् ॥ प्राण एव प्रज्ञात्मानंदोऽजरोऽमृतः ॥ इति श्रवणात् ॥ तथा च ॥ अ २६
हं ब्रह्मास्मि ॥ मामुपास्व ॥ इति ब्रह्मदृष्ट्योपदेशः ॥ तथा हि ॥ कृष्णादयोऽप्यर्जुनादीन्प्रत्युपदिष्ट
वंतः ॥ ३१ ॥ पुनराशंक्याह ॥ ॥ जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादि

हतयोगात् ॥३२॥ ॥ ब्रह्मज्ञानोपासनया ब्रह्मभावमुपगतस्य विगलितजीवभावस्य तद्रूपहृष्टा
स्वस्मिन्नुपास्यत्वसर्वात्मभावोपदेशो न युक्तः । अत्र "त्रिशीर्षाणं त्वाष्ट्रमहनं" "यावद्ध्यस्मिन् शरीरे
प्राणो वसति तावदायुः" इत्यादौ जीवत्वलिंगं मुख्यप्राणलिंगं च दृश्यते । ततोऽयमुपदेशो न यु
क्त इति चेत् । नैवं वाच्यं । यतो जीवप्राणशब्दवाच्यत्वं परमेश्वरस्य समुचितं । उपासनात्रैविध्याद्धे
तोः । अत्र परमेश्वरस्य स्वरूपेण भोक्तृशरीरेण भोग्यरूपेण चोपासनं त्रिविधमिह विवक्षितं[1] ।
आत्मतया भोग्याभिन्नत्वेन च तदुपपद्यते । परमेश्वरस्य स्वरूपोपासनमविलंबेन मुक्तिहेतुः । अ ३७
न्यदपि द्वयं कालेन । तस्मादिह परमेश्वरात्मकतयैतद्रूपोपासनसिद्धिरिति निर्णयः ॥३२॥ ॥
इति श्रीकंठशिवाचार्यविरचिते ब्रह्म[2]मीमांसाभाष्ये प्रथमाध्यायस्य प्रथमः पादः ॥ ॥

१ त्रिविधं । इति पा० । २ श्रीमद्ब्रह्म- इति पा०

इतिव्याससूत्रीयब्रह्ममीमांशैवभाष्यस्यप्रथमाऽध्या
यस्यप्रथमपादः समाप्तः॥